[illegible]

Pranearao BABL [illegible]

14.6.43	[illegible]	15			
	[illegible]				
	[illegible]		4	–	–
	[illegible]	730	0	2	6
	[illegible]	3500			
	[illegible]	700	0	1	.
	[illegible]		0	2	.
	[illegible]		1	0	0

जवाबी
REPLY

Sri

Anandathirtha Sharma

Sri Panini Mahavidyalaya

ATMAKUR (PO)

(Kurnool dt) (A.P)

पिन PIN 518 422.

देहलीतः
२।४।८६

अयि प्रेयांस आनन्दतीर्थशर्माणः,

पत्रमाप्तं
वर्तं चा कुशलम्। भवते भवतो ऽन्यमनस्कतया महा ऽ
व्यथा जायते, वाग्व्यवहारादर्शे इत्येव मे कृते-
ऽभिरुच्या। सा च भवतां उद्देशो न भवतीति नैव
मार्जनीयं भवति। कुशलमन्यत्।

भवतां हिताकाङ्क्षी
वासुदेवः शास्त्री॥

तत एव संस्थानात् Indological
Research Journal इत्याख्यनुसन्धान
पत्रिका वर्षस्य द्वि: समुन्मेषं गते, तत्रा
पि श्रीमद्भागवतभाषापरिच्छेद इति
प्रतिपादको मे निबन्धः सन्निवेशमला-
ञ्चेति सोऽपि सद्यो: प्रेक्षावद्भिरामूल-
चूलं परीक्षणीय इत्यभ्यनुसन्धे। उत्तरा-
र्थाद्भिरत्र भवद्भि सत्तरार्थविन्यासस्य
कृते यत्पत्रमति रिक्तं प्रहीयते तन्मां त्रेपयति,
नहि तदन्तरा प्रतिवचो न वितरीष्यामीति
प्रत्येतावकल्पयितुम्। तेनाभ्यर्थये ~~अतः~~ परमति
रिक्तपत्रप्रेषणेन मा [illegible] मां तिरयन्तु भवन्त इति।
उक्तं ~~[illegible]~~ [illegible] इति निरमति विद्यांविधेयश्चारुदेवशास्त्री।

पोस्ट कार्ड
POST CARD
जवाबी
REPLY
केवल पता
ADDRESS ONLY

INDIA
भारत

B. H. Padmanabharao
X Atmakur X
Kurnool Dt
(Andhra Pradesh)

३।२४ देहलीशाखानगरी
रूपनगरात्
३०।३।६८

प्रिय मानभाजः सखायः,

अद्य चिरस्योपनतो भवत्कः कुशलोदन्त इति किमपि सुखाये। शमत्र, भवतां चेष्यमाण-माशंसे। पञ्चापान्तःस्थाद् होशियारपुरादन्तिके साधुआश्रमे वैदिकानुसन्धानसंस्थाने विश्वसंस्कृतमित्यभिख्यं त्रै-मासिकं संस्कृतपत्रं प्रकाश्यते। तत्र संस्कृतवाग्व्यवहारः भट्टिकाव्यविमर्शः, पाणिनीयशास्त्रे काश्चिद् व्यवहार-दिशा इति विषया मे निबन्धा अन्तरान्तरा प्रकाश्य-मासीवदन्निति विदाङ्कुर्वन्तु सन्तोऽर्हन्तः। ते च भवा-दृशैर्वाग्विचक्षणैरभिलक्ष्यतां नेया इति विनीतवद् वेदये।

देहलीतः
१९।८।७५

अयि मानभाजः शरण्याः, प्रणतिपुरःसरं निवेद्यते भावत्कं कुशलोदन्तं विदित्वा परं परितोषमविदम्। उपसर्गार्थचन्द्रिका विषये निवेदनेन सखेदमुररीक्रियते नेयमद्यापि प्राकाश्यं यातेति। अद्य पञ्चदश समाः प्राप्ताः प्रणीतौ व्यापृतस्य मे। सम्प्रति प्रत्येमि मासेनैकेनेयं मुद्रणार्हा भविता। ततो मास-षट्केन प्रायः लिखितमुद्रणा वर्तितेति। यावदेव सम्मुद्रितवड्रा भविष्यति तावदेवात्रभवतः प्रति प्रहेष्यते। अनारतेन लेखनो-द्योगेन श्रान्तोऽस्मि, जराजर्जरीताङ्गोऽशीतितमं वर्षमनुभवामि, तेन मन्दाये। इयं मेऽन्त्या कृतिः, नातः परं शक्ष्ये लेखितुम्। अध्ययनव्यसनिता तु नोपरंस्यति, अपि तु हीनेन्द्रियत्वेऽपि।

अत्रभवतां सकलत्रपुत्राणां श्रेयःप्रेयसी प्रार्थयमानो
चिरमायुष्यं चिरं विधेयश्चारुदेवशास्त्री॥

इयं मे क्रिया पत्रपार्श्वनिं सम्प्रशाती-
व्यापस्यतीति संभावयामि।
इति वन्द्यशेषः।

पोस्ट कार्ड
POST CARD

Shri Pandit B.H.
Padmanabha Rao,
Panini Mahāvidyālaya
Atmakur
(Dist. Kurnool)
(A.P.)

पोस्ट कार्ड
POST CARD

केवल पता
ADDRESS ONLY

Pandit Padmanatha
Shastri
Pāṇini Mahā Vidyalaya
Atmakur P.O.
(Dist. Kurnool)
(A.P.)

२/५४ रूपनगरम्
देहली[illegible]
१८/१२/७०

श्रीमि पण्डितल्लजाः

सनमस्यं विनिवेदयामीतः

सागरे सम्पद्धितये व्याकरणचन्द्रोदयसमारब्धां नूत्नां
मम क्रियां मत्कृतीं नवाह्निकावच्छिन्नमहाभाष्य-
विवृतिं च स्वाकर्ण्यैवात्र भवद्भ्य उपग्राहयितुमिति
प्रैषयम् । तदिदं भवत्पाणिपल्लवप्रणयितामगमद्धुता-
हो नेति नाद्यापि व्यवसितं वेद । येन चिन्ताचान्तं
मे चेतो न क्षणमपि निर्वृणुते । यद्येयं मे चिन्ता वीयात्तथा
ऽकालहीनमहं पुस्तकसम्प्राप्तिं वेद्य इति विनीतवत
वन्वे । सत्यवसरे ऽदो ग्रन्थं गुणदोषतः परिच्छिन्द्ये-
मामनुगृह्णन्तु सन्त इति च सम्प्रार्थ्य विरमति

विदुषामाश्रवश्चारुदेवशास्त्री ।।

ATMAKUR KURNOOL
15.10.84
5 AM

Shri B. H. Anandatirtha
Sharma
Shri Panini Mahavidyalaya
Atmakur P.O.
(Dist. Kurnool)
पिन PIN (A. P.)

देहलीस्थाद् रूपनगरात्
१०।१०।८४

अयि प्रिय आयुष्मन्त आनन्दतीर्थशास्त्रिन्,

नूत्नां मत्कृतिं श्रीमद्भगवद्भावपरिच्छेदं सद्यः प्रकाशितां स्निग्धाय भवते सप्रणयमुपायनीकर्तुमीहे। अस्य ग्रन्थस्य ७५ रूप्यका मूल्यमस्ति। भवांस्तु केवलं चतस्रो राजतीर्मुद्राः सम्प्रेषयतु। ता दृष्ट्वैव समनन्तरं पुस्तकं प्रेषयिष्यामि। मत्सखा भवतस्तातचरणा मत्प्रणतिं सप्रश्रयं वाच्याः।

भवदीयः,

चारुदेवः शास्त्री॥

अन्तर्देशीय पत्र कार्ड
INLAND LETTER CARD

Shri B. H. Anandathirtha Sharma
Sri Panini Mahavidyalaya.
ATMAKUR,
(Kurnool Dt) Andhra Pradesh.

पिन PIN 518422

इस पत्र के भीतर कुछ न रखिए NO ENCLOSURES ALLOWED

प्रेषक का नाम और पता :— SENDER'S NAME AND ADDRESS :—

Prof. Chandrika Shastry,
3/54, Roop Nagar

पिन PIN DELHI (7)

३।२४ रूपनगरात्
देहलीशाखानगरात्
२६।३।८१

आयुष्मन्तः प्रियाः आनन्दतीर्थशर्म्माणः।

अद्य स्यन्दितोऽहं

यदहं सुभगाशयं चेतःसुखावहमतर्कितोपनतं पत्रमापम्। अस्यां उपसर्गार्थचन्द्रिकायाश्चतुर्थस्य खण्डस्याद्यास्य प्रकाशने किञ्चिदनिकृष्टमुत्प्रेक्ष्य विद्यमानमानसा जीवका भवन्तः समासते, जिज्ञासन्ते च तत्र प्रतिबन्धो निदानम्। तत्रेदं निवेदुं नु सन्तः— साग्रं संवत्सरं चतुर्थपञ्चमखण्डात्मको ग्रन्थः सम्यक् लिखितो मुद्रणार्हो मया यस्मात्। अलङ्कृत ग्रन्थोऽपि प्रकाशकैर्मुद्रयितुं नो अग्नोऽभूत्। अह मर्त्यकुचक्री, कुगेहे चातिवेलं महार्घमिति करसा माक्षन्दनिव प्रत्यपादीत्। इमामस्य परावृत्ता मखिलसीकृत्याहं व्यवसासियं स्वेनैव धनेन नियतेन मुद्रापणमुपक्रमणीयमिति। उपक्रान्तमुद्रणस्य चतुर्थस्य खण्डस्यायं द्वितीयो मासः। मन्दमन्दा प्रवृत्तिः। तथाप्याशंसे जूनमासस्य द्वितीयस्मिन्सप्ताहे खण्डोऽयं प्रकाश्यं यातेति। तत ऊर्ध्वं त्वरिततरया गत्या पञ्चमस्य मुद्रणमुपक्रंस्यते, परिनिष्ठास्यति च निगासितारमभ्यादा। इत्येव तावद् व्यवसितं वस्तु मीशे।

आशासे ऽत्रत्यस्वस्था भवन्तो तातचरणाः सर्वथा कुशलिनः शास्त्रशीलने रताः सुखमेधन्त इति। इह सर्वं सत्कमीशानुग्रहेणेति समकुर्वं वक्तव्यमुदीर्य वचसां विरतिं वितनोति विदां विधेयश्चारुदेवशास्त्री॥

FIRST FOLD

DR. SATYAVRAT
Śāstrī, Vyākaraṇācārya,
M.A., M.O.L., Ph.D.
READER IN SANSKRIT
UNIVERSITY OF DELHI

Phone : Res. 226371
3/54, Roop Nagar,
DELHI-7

Date २४।८।६८

अभ्यर्हन्तश्शास्त्रिमहाभागाः,

सनमस्यं विज्ञापयामीतो भूय-
स्त्वद्यस्त्ववाप्तं स्नेहसाभिष्यन्दि भवत्कं दलम्। उक्ते यदेत-
वन्तमनेहसं न्यलम्बि तन्मे मर्षयन्तु सन्तः। चिरमह-
मचिचिन्तं किमुत प्रकृते प्रादि सेयमिति। इत्थं द्युतियादि-
षु शब्देषु तकारद्वयस्य दुष्परिहरत्वं सुविदितं मे।
तथापि यत्र क्वचन एकेन तकारेण तांस्तान्छब्दान् विन्या-
स्यमिति तत्र बहुत्र तथादर्शनात् संस्कारः कश्चिद्बलवान्
मे प्राभूदिति वाच्यतां गतोऽस्मि। तन्मे सर्वं विनुदन्तु। अथ-
त्वे व्याकरणचन्द्रोदयो नाम नूतना कृतिर्मुद्रणयन्त्रस्था वर्तते
तत्रास्मिन्विषये प्रागेव मया सावधानहितमिति निर्दिष्टा दृष्टि-
रासीत्। प्रथमः खण्डोऽस्य ग्रन्थस्य मासेन समाप्तिमेता,
यावदेव प्राकारमं याति तावदेव विपश्चितां सुहृदां सम्पयिष्ये।

प्रत्येमि खण्डस्यास्यावलोकनेन ... नेत्र-
सरवाप्य: । अपि नाम मयाऽनूदितमिदं महा-
भाष्यस्य प्रथममाह्निकं नवकमाह्निकलघीकृतं
स्याद् बहुविद्भिर्मनीषिभिः । अत्र कुतो नवं
पश्यन्ति कृष्य इति जिज्ञासते चेतः ।
अप्यत्वे जरा विक्लवगात्रस्य मे स्खलन्त्यक्षराणि
ति लिलेखिषितो यो ऽवशं विपर्यस्यति । तन्ना-
तीवादृत्यमिति सम्प्रार्थये । अन्तराऽन्तरा कुशलोदन्तो
देय इति याचमानो विरमाम्यहं विदुषां विधेयश्च
वासुदेवशरणः ॥

Pandit B. H. Padmanabha Rao,
Shri Panini Mahavidyalaya,
Atmakur P.O.
(Kurnool Dist.)
(A.P.)

15 भारत INDIA

28.6.83
9 AM

Shri B. H. Ananda tirtha
Sharma

Shri Pa... Mahavidyalaya

Atmakur P.O.

(Dist. Kurnool)

A.P.

पिन PIN

देहलीतः
२३।६।८३

आयुष्मन्तः श्रेयांस आनन्दतीर्थशर्माणः,

स्वस्त्यस्तु । पत्रमिदमवेदिषञ्च वृत्तम् ।

सप्तमी शौण्डैः (२।१।४०) इत्यनेन सप्तम्यन्तमन्तःशब्देनाधिकरणप्रधानेन समस्यत इति शरीरान्तरित्यादि निर्दिष्टम् । अन्तःशब्दस्य शौण्डादिगणे पाठात् ।

पाणिनीये धातुपाठेऽर्थनिर्देश इत्यभिधानको मे निबन्धस्तु सम्प्रति दुर्लभः । मय्येवैकस्तिष्ठति, सोऽपि यत्नान्वेष्य इति कामं भवतां समर्थयितुं नालमस्मीति निवेद्य विरमाम्यहं विदां विधेयश्चारुदेवः शास्त्री ॥

3/54 रूपनगरात् देहली-
शास्त्रानगरात्
26|3|81

प्रियतमा आयुष्मन्तः,

ह्योऽहमन्यमनाः संमूढमना वा व्यवपूर्वस्य स्यते लुङ्युत्तमैकवचने यद्रूपं व्यालिखं तत्र 'सा' इत्यक्षरमध्यलिखम्। तदित्थं साधूकृत्य पठनीयम् — 'व्यवासिषम्'। अन्यथा गुरुर्दोषो मा भूदिति शोधनपत्रिकेयं प्रहीयते, त्वरमाणेन प्रत्यवायभीरुणा मया। अन्यत् सर्वं कुशलम् इति निवेद्य विरमति भवदां विधेयश्च,

चारुदेवः शास्त्री॥

Shri BH. Ananda Tirtha
Sharma
Pānini Mahā Vidyālaya,
Atmakur P.O.
(Dt. Kurnool)
(A.P.)

पिन PIN

संस्कृतप्रेमिभ्यः सुहृद्भ्यः पुस्तकानि
यथावसरं दास्यामि।

डॉ. श्री. भा. वर्णेकर

एम्. ए., डी. लिट्.

संस्कृत विभागाध्यक्ष

नागपुर विश्वविद्यालय

(सेवानिवृत्त)

प्रधान सम्पादक (मानद)

संस्कृत वाङ्मय कोश

८१, अभ्यंकर नगर,

नागपुर-४४० ०१०

दूरभाष : २४३७३

भा र ती य भा षा प रि ष द

३६-ए, शेक्सपीयर सरणी, कलकत्ता-७०० ०१७

श्रीमते आनन्दतीर्थशर्मणे || श्रीः || युगाब्दः ५०९२
नमो नमः । दि. १४.५.९०

श्रीमता आत्मीयतया प्रेषितं श्रीकृष्णभूमिनृत्यष्टकं (५ पुस्तकानि) यथावसरं सम्प्राप्तम् । अस्य पुस्तकस्य द्वितीयं संस्करणं विद्यया प्रकाशितम् इति ज्ञात्वा काव्यस्य रसिकप्रियता अनुमीयते । आंग्लभाषानुवादेन लघुविवरणेन च संस्कृतानभिज्ञानां मित-संस्कृतज्ञानां च सुखबोधाय संस्करणमिदं नूनं कल्पेत । अनेन पत्रेण सह सद्यःप्रकाशिता मदीया श्रीराम-श्रीकृष्ण संगीतिका च प्रेष्यते । कृपया तत्प्राप्तिः पत्रोत्तररूपेण सूच्यताम् ।

भवदीयः श्री.भा. वर्णेकर
प्रज्ञाभारती

भागवतभाष्यपरिच्छेद इति नामा
बृहद्ग्रन्थः बी. बी. आर् इंस्टिट्यूट्
होश्यार इत्यनेन संस्थानेन प्रकाशितः।
इयं मे भागवतभाष्यविमर्शपरा दृढ-
म्प्रथमा कृतिः कृतिनां प्रतुष्ट्याय प्रस-
दाय भविष्यतीत्याशवलिमि। अत्रार्थे
तत्रैव पत्रं प्रेष्यम्।

इति निवेदयति
विदां विधेयश्च
वासुदेवः शास्त्री॥

15 भारत INDIA

जवाबी REPLY

B. H. Anandathirtha Sharma
Sri Panini Mahavidyalaya
ATMAKUR
(Kurnool dt) (A.P)
पिन PIN 518422

देहलीशाखानगराद्रूपनगरात्
११।२।८४

आयुष्मन्तः प्रिया आनन्दतीर्थशर्माणः।
इह स्वस्ति। आशासे सहपितृचरणाः सर्वे भवन्तः
स्वस्तिमन्त इति। वैयासकिरित्येवावदातं रूपम्।
इकारमध्यः पाठस्त्वनवधानकृतः।

अयं नूतन उदन्तः प्रीणयिष्यत्यत्र भवतः।
शब्दापशब्दविवेकस्य साद्यत्कं संस्करणं प्रकाशितम्
साम्प्रतमयं ग्रन्थो बृहत्कायतरः सम्पन्नः, ३८० महा-
पृष्ठानि पत्रपार्श्वानि व्याप्नोति। "नाग पब्लिशर्स्"
पोस्ट ऑफिस बिल्डिंग, जवाहरनगर, दिल्ली-११०००७
इत्यतः प्राप्यः। इयं चापरा प्रियङ्करा वार्ता— श्रीमद्-

अन्तर्देशीय पत्र कार्ड
INLAND LETTER CARD

To

Shri B.H. Anandathirtha Sharma
Shri Panini Mahavidyalaya
ATMAKUR (Po)
KURNOOL (Dt)
(A.P.)

तीसरा मोड़ Third fold

प्रेषक का नाम और पता :— Sender's name and address :—

Prof. Chamdeo Shastry, M.A.M.O.
3/54 Roop Nagar
DELHI-7

ATMAKUR-KURNOOL
DELY
KURNOOL

इस पत्र के भीतर कुछ न रखिए NO ENCLOSURES ALLOWED

← पहला मोड़ First fold →

देहलीशाखानगराद्रूपनभरात्
२।५।७२

अभ्यर्हणीयचरणाः,
साशीर्वचनमुपाहरामि नैता-
वन्तमनेहसं नैभृत्यं मेऽकारणमभूत्। शरीरदौःस्थ्यं तावत्कोपीयः प्रतिबन्धः प्रदेशानां प्रत्यवायात्। पुष्कलैहि-परिकर्मणि व्यापृतैस्तत्तदर्थप्रत्ययनस्थापने प्रसक्तो भवत्कं चलं कश्चिन्महति पुस्तकसंभारेऽन्तर्व्यधायि, तच्चाद्य चिरस्य प्रयत्नातिरेकेण प्रत्यलप्सि। अत्र भवत्कृतां विवेचनां बहु प्रशंसामि। नहि अवीयसा मादृशेन जनेनोदितमिति सहसाऽऽदराद्ग्राह्यं भवति। भवत्प्रणीते समाधाने यादृशं मे दर्शनं तादृगुपन्यस्यामि। तद्विमर्श्यं सुधीभिः।

जीवनैकशरणः — अत्र एकं शरणं (रक्षणं) यस्मादिति व्यधिकरणबहुव्रीहिराश्रितः। व्यधिकरणबहुव्रीहिस्तु क्वचिदेव नाक्रेयो जन्माद्युत्तरपदः। आचार्यस्तु अनेकमन्यपदार्थे इत्यनेन समानाधिकरणमेव इच्छति। किं च शरणशब्दो रक्षितरि प्रसिद्धो रक्षणे तु विरलप्रयोगतमः। बाढं शरणे साधुः शरण्य इत्यत्र रक्षणमर्थमर्पयति। शोकमलीमसम् इति मलीमसशब्दे कर्मधारये प्रयोगो नातीव रुच्यः। नहि क्वचित्कः परनिपातोऽनुशिष्यत इति व्यस्ततन्त्रः स भवति। तत्र शिष्टप्रयोगानुग्रहोऽवश्यमेषणीयः। नाभीदं भारतं वर्षमिति यद्यपि वैजयन्त्यां पाठः, तथाप्येतद्देशनामसु सुतमामप्रतीतमिदं नामधेयमिति न प्रयोगमवतरीतुमर्हति। बहुदृश्वभिर्भवद्भिः कोऽस्य प्रयोगोऽदर्शि। अप्रसिद्धपदप्रयुक्तिश्च परत्र प्रतिपत्तिमङ्क्तिं जरयतीति परिहार्या। परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विष इति ब्राह्मणं आहतम्। यदि तैरेव विषये साधर्म्यं काम्यते कामं तथा प्रवर्तन्तां भवन्तः, अहं तु तन्नाभिरोचयामि। नैकं हि त्वाः (गावः) इत्यस्य समाधित्सया भूयः प्रयत्नं भवद्भिः। यदि गोशब्दः समुदायालम्बनेन धेनुतद्वत्सबलीवर्दादीनां वाचकस्तर्हि

तत्प्रवृत्तिनिमित्तगोत्वान्वयि नपुंसकत्वं कुतो न।
संख्या च नामानि शौतोऽर्थ इति न बुद्धिमुपारोहति।
द्विशब्दः सम्भ्रम इत्यत्र किं मानम्। प्रकृतकमधि-
कृत्य यदभाणि तत्र नाहं बहु विमर्शं विवक्षामि। अनन्वितः
प्रशब्दः स्वदेशव्यवहारानुरोधेन प्रयुक्तो यथा प्रस्मरती-
त्यादिषु दृश्यत इति यदुक्तं तद् दुरुक्तम्। प्रस्मरतीत्यस्य
विस्मरतीत्यर्थोपलम्भात्। 'विदुरसान्नाम्' इति नूतनं
प्रयोगं परिचेतुमनर्होऽयं जनः। अत्र किमभिप्रयन्ति
विर इति विविदिषामि। 'श्रीकेशवहेडवारपद्यगाः' अत्र
साधुः समासो निर्दिष्ट इति नन्दामि।

अत्र पत्रे प्रहेतुं कल्पयन्तीत्यत्र भिन्नकर्तृकतायामपि
तुमुन्प्रयोगश्चिन्त्य इति मन्ये। कथं वात्र सूरयः
पश्यन्ति।

पत्रान्तरेऽचिरं प्रहिते कार्मठीनजना इति प्रयोगे
कार्मठीत्यप्रयुक्तं पूर्वमिति परिहार्यम्। भावष्यञन्तस्य
स्त्रीत्वविवक्षायां ङीपि सत्यपि नेदं सुप्रयुक्तं मन्ये।
यद्येवं यत्र तत्रानर्गलं ष्यञन्तान्ङीप् क्रियेत तदा
ब्राह्मण्यार्थे ब्राह्मणीशब्दप्रयोगोऽपि साधुः स्यात्।
ब्राह्मणीशब्दः कालत्रयेऽपि न ब्राह्मण्यमभिधातुमीष्टे।
तत्रास्य रूढिर्नास्तीति। भूयश्च न चेम परोक्षप्रियता
देवानामिवापि मानवानामपि चेति।

राष्ट्रशब्दो यद्यपि पुन्नपुंसकयोः पठितः प्रायेण
तथापि नपुंसक एवास्य प्रयोगः प्रकृत इति तल्लिङ्गः
प्रयोज्यः। लिङ्गविशेषसमाश्रयेऽर्थान्तरमप्रतिपादितार्थ-
भूतमपि गम्यत इति चेदभ्युपेयेत कौसल्यायां हीनिवेवा-
यां दारशब्दप्रयोगो न युज्येत, प्रयुक्तः स प्रागल्भ्यार्थ-
ऽऽमननाद् विरुद्धमतिकृत्स्यात्। पुंलिङ्गयुक्तेन राष्ट्रशब्देन
देशोऽयं पुम्बहुलः पुंशक्तिबहुल इति वा कः कथं प्रतीयात्।

इति यथामनीषितं प्रयोगा भावत्का विमृष्टाः।
आशासे सन्तः सन्तोक्ष्यन्त्यनेन विमर्शेनेति विरमा-
म्यहं विदां विधेयश्चारुदेवः शास्त्री॥

देहलीस्थाद्रूपनगरात्

२१. ८. ६६.

अयि पण्डिततल्लजाः,

प्रणतिपुरस्सरं निवेदयामीतः

कियति चिरकाले भावत्कं पत्रमविरमवेदिषं च यत्नम्। उत्तरस्य कालं तु नावापं कार्यान्तरासङ्गाद् गेहिन्या ग्लानुपाच्च। तत्क्षमयामि भवन्तम्। स्थेमशब्दविषये साधु दृष्टिं विचक्षणैः। सत्यं वाक्यमुक्तावल्यां पृथ्वा-दिष्व इममिन्द्रियेति सूत्रोपन्यासोऽसाम्प्रतम्। महानेवा-ऽनुग्रहो मयि यत्प्रमादो मे विभावितो मां च विज्ञापितः। तदिदं मे प्रहर्षाय न त्वहर्षायेत्यमायं वचः। विभ्रमनिरासो ह्यभीप्सते। स चेत्स्यु तत्कृतः सिद्धं नः समीहितम्। एवं सूक्ष्मेक्षिकया पर्यालोचयन्ति भवादृशास्तान्मे लेखान्,

अवश्यं चेयानि मे स्खलितानि यत्र
तत्रोपलब्धानि । नाहमत्र दोषं ग्रहीष्य
इत्याश्वासयन्विरमाम्यहं विदां
विधेयश्चारुदेवशास्त्री ॥

पोस्ट कार्ड
POST CARD

केवल पता
ADDRESS ONLY

INDIA
6 nP
६ नये पै
भारत

KURNOOL

Pandit B. H. Padmanabha
Rao,
Shri Pāṇini Mahāvidyalaya
Atmakur P.O.
(Dist. Kurnool)
(A. P.)

13 8 76
9 30 AM

पोस्ट कार्ड
POST CARD

केवल पता
ADDRESS ONLY

Pandit Shri B. H. Anand-
tirtha sharma,
Shri Panini Maha vidyalaya,
Atmakur - 518422
(Dist. Kurnool)
(A.P.)

पिन PIN

देहलीशाखानगराद्
रूपनगरात्
९।८।६६

अयि प्रेयांसो विद्वांसः,

अधिगतं भवत्कं दलमवेदिषं च वृत्तम्। मानभाजो मे सखायो भवतां पितृचरणा नूतनायां मात्रिमायां वाग्व्यवहारादर्शे प्रणीयतीमपि गुणकालिकां पश्यन्तीति धन्यमात्मानमाकलयामि। उपसर्गार्थचन्द्रिकायत्वे सम्मुद्र्यते, शतं च पार्श्वानि निर्वृत्तमुद्रणानि। मन्ये परिशिष्टानि पञ्चशतानि मासपञ्चकेन मुद्रणमाप्स्यन्ति। अयं प्रथमः खण्डः। द्वितीयश्च ततः परैः षड्भिर्मासैः प्रकाशमेष्यतीति संभाव्यते। खण्डद्वयं पत्रपार्श्वसहस्रमपि व्याप्स्यतीति विदाङ्कुर्वन्तु सन्तः। अन्तरान्तरा स्वस्य कुशलोदन्तः प्रेष्य इति प्रार्थयमानो विरमाम्यहं विदां विधेयश्चारुदेवशास्त्री।।

देहलीशाहजानगराद्
रूपनगरात्
२।८।७६

अयि श्रेयांसो विद्वांसः !

अविदमावृतकं दलमवेदिषं च वृत्तम्। मानभाजो मे सखायो भवन्तो पितृचरणा नूतनायां मत्क्रियायां वाग्व्यवहारादर्शे प्रणीयमानेऽपि गुणकलिकां पश्यन्तीति धन्यमात्मानमाकलयामि। उपसर्गार्थचन्द्रिकाऽद्यत्वे सम्मुद्र्यते, शतं च पार्श्वानि निर्वृत्तमुद्रणानि। मन्ये परिशिष्टानि पञ्चशतानि मासपञ्चकेन मुद्रणमाप्स्यन्ति। अयं प्रथमः खण्डः। द्वितीयश्च ततः परैः षड्भिर्मासैः प्रकाशमेष्यतीति सम्भाव्यते। खण्डद्वयं पत्रपार्श्वसहस्रमभिव्याप्स्यतीति विदाङ्कुर्वन्तु सन्तः। अन्तरान्तरा स्वस्य कुशलोदन्तः प्रहेय इति प्रार्थयमानो विरमाम्यहं विदां विधेयश्चारुदेवशास्त्री॥

Shri B. H. Anandatirtha
Sharma,

Shri Panini Mahavidyalaya

Atmakur (Pin 518422)

(Dist. Kurnool)
(A.P.)

पिन PIN

३।५४ रूपनगरात्
देहलीत्यात:
२१।५।६१

आयुष्मन्त आनन्दतीर्थशर्माण:

इतो हि लिखितये जीवके:

प्रियै भवद्भि: प्रहिता: पञ्चानि शाद्रूव्यका अधिगता: ।
चतुर्थ: खण्ड स्त्वनवसित मुद्रणो मध्ये कलिलं तिष्ठति । प्राक्-
यत्नेन इष्विप्रराधिना, गुरुपदतोऽपि, मुद्रको ति मन्थरं प्रकामति,
एवं प्रकाम ननयं कदा नु पारमेताऽवनो विदूरस्येति चिन्ता
मामाक्रामतीव । अद्य सार्धाश्चत्वारो मासा मुद्रणस्य प्रक्रान्तस्य ।
नवतिश्च पत्र पार्श्वानि मुद्रितानि । द्वित्रैरहोभि मुद्रणालयान्तरं
सङ्क्रमिष्यति मुद्रणमिति बलवदाशासे । नो चे महती ग्लानि-
र्जनिष्यते । विनियुक्तचर: सर्वोऽपि श्रम विफलो वैयर्थ्यमा-
पत्स्यते । मुद्रणागारान्तरे सङ्क्रान्त्यां सत्यां भवतो भूयो
वेदयिष्यामीतीहैव विरमामि विदां विधेयोऽहं वासुदेव: शास्त्री ॥

KURNOOL
25.9
DELY

Shri B. H. Padmanabha Rao,

Shri Panini Mahavidyalaya

Atmakur P.O.

~~(Dist. Kurnool)~~

(A.P.)

Atmakur

देहली:
२३।८।७५

प्रिय प्रणयिन्,

भवद्भिरपेक्षितं समाधिं पत्रे निवेश्य सः प्राहायि। त्वरमाणेन मया चाद्यनामधेयनिर्देशे श्री-लालजि महाविद्यालय इति संनिवेशो नाकारि। तेन वाक्ये प्रहितं मे पत्रं भवत्पार्श्वे पल्लवप्रणयि न स्यात्। तेनार्थितो यत्नो रूपोपलब्धौ कार्यः प्रबन्धकृतो मे प्रयासो व्यर्थो मा भूत्। अवश्यं सम्प्राप्तिरस्य मां वेदयेत्।

इति निवेदयति
विदां विधेयः
चारुदेवशास्त्री॥

अन्तर्देशीय पत्र कार्ड
INLAND LETTER CARD

नवम एशियाई खेल
IX ASIAN GAMES
DELHI 1982

35 INDIA 35

DELHI

Shri

B.H. Anandathirtha Sharma.
Sri Panini Mahavidyalaya.
ATMAKUR,
(Kurnool Dt) (A.P)

पिन PIN 518422.

तीसरा मोड़ THIRD FOLD

इस पत्र के भीतर कुछ न रखिए NO ENCLOSURES ALLOWED

प्रेषक का नाम और पता :— SENDER'S NAME AND ADDRESS :—

Prof. Charu Dev Shastri,
DELHI-7

पिन PIN

देहली शाखानगराद्
रूपनगरात्
१६।१०।[illegible]२

अयि प्रेयान् आयुष्मन् आनन्दतीर्थशर्मन्,

अद्य कतिपये दिवसा अत्र भवतां लेखस्य सम्प्राप्तस्य। इमानि वासराण्यहं देहलीतो बहिरभूवम्, अत एतावत्कालमुत्तरं नादाम्।

पाणिनीये धातुपाठेऽर्थनिर्देश इत्यधिकरणको मे निबन्धः सम्प्रति दुर्लभः। मदीये नैजे पुस्तकालयेऽप्यसौ ग्रन्थः क्व निहित इति नाध्यवैमि। यदि कदाचिल्लभेय प्रतिलिपीं कृत्वाऽसन्देहं सम्प्रेषयेयम्।

इदं विज्ञायमानं भवतां हर्षाय भविष्यति उपसर्गार्थचन्द्रिकायाः प्रथमः खण्ड इदानीं प्राकाश्यं गत इति। जयपुरे भविष्यमाणे प्राच्यविद्याविशारदानां सम्मेलनेऽयं ग्रन्थो [illegible]। अयं च बृहत्कलेवरतर [illegible] महार्घः। मत्सकाशात्तु शक्योऽयं अशीत्या रूप्यकैर्नेतुम्।

अन्यत् सर्वं सुस्थम्।

मत्स्नेहभाजनतराः तत्र भवतां पितृचरणा मत्कारणादभिवाद्याः। इति विरमति

विदां विधेयः
चारुदेवः शास्त्री॥

अन्तर्देशीय पत्र कार्ड
INLAND LETTER CARD

1973
11 JLY
16 HRS
DELHI

भारत
20 INDIA 20

Shri B. H. Anandathirtha Sharma,
Shri Panini Mahavidyalaya,
Atmakur P.O.
(Dist. Kurnool)
(A.P.)

पिन PIN

तीसरा मोड़ THIRD FOLD

इस पत्र के भीतर कुछ न रखिए NO ENCLOSURES ALLOWED

प्रेषक का नाम और पता :— SENDER'S NAME AND ADDRESS :—

Prof. Charu Deva Shastri,
3/54, Roop Nagar,
Delhi—7

पिन PIN

यहां से खोलिए TO OPEN CUT HERE →

पहला मोड़ FIRST FOLD

देहलीशास्त्रीनगराद्रूप-
नगरात्
१०।७।७७

आयुष्मन्तः सन्तः,

इतो ह्यहे आयुष्मतां सकाशात्
पत्रमाप्तं बहु च चिन्त्यमिति सद्यः प्रतिवक्तुं नाशकम्।
तेन चिरस्य प्रतिब्रुवन् क्षम्यः। पातुं पयांसि शिशव
इत्यादिवाक्ये दुःश्लिष्टानि पदानीत्यभ्युपगमनायमुपेयम्।
समानकर्तृकतायां तुमुन्निष्यते। अत्र च भिन्नकर्तृकतायाम्।
न हि भवति श्राद्धे विप्रान् भोक्तुं निमन्त्रयत इति। गो-
प्रद इति पुंल्लिङ्गं विशिनष्टि। गां प्रददातीति गोप्रद इति-
सामान्योक्तिः। कस्मा इति नोच्यते, तस्यार्थस्य प्रकरणादुप-
लब्धेः। यथाप्राप्ते (हेतुगर्भं) तुमुण्ण्वुलौ क्रियायां क्रियार्थायामिति (चेद् विशेषणम्।)
~~शिशुकर्तृक~~पयःपानार्थी पूर्वलिङ्ग जनित्यवेति गम्येत,
~~को प्रसङ्गविनिश्चितेतीदं~~ वाक्यमविवक्षितार्थसमर्पकत्वा-
दपार्थकं भवतीत्युपेक्ष्यम्। कथंचित् (पदार्थः पदार्थेना-
न्वेति न तदेकदेशेनेत्यनादृत्य) (समासैकदेशेन ददातिकर्मणा
गवा अन्वयेऽपि शिशव इत्यत्र चतुर्थीस्थाने। शिशोः
पयःपाने कर्तृता समन्विता, ददातिकर्मणा गवा अभि-
सम्बन्धात् सम्प्रदानता च प्रसक्ता, इत्युभयप्रसक्तौ
कर्तृतैव स्यात् परेति। कृद्योगलक्षणा षष्ठी च प्राप्नुःस्यात्।
परमुभयप्राप्तौ कर्मण्येवेति नियमात् कर्तरि तृतीयैव
साध्वी। अविवक्षितत्वात् कर्तृतां शेषे षष्ठ्यपि
नासाध्वी। एकदेशान्वयो नाभ्यागतिकस्य गतिरिति
तदनादरे कृद्योगे चास्ति शिशोर्गोप्रद इत्यादौ शे-
षविधौ षष्ठ्येन शास्त्रव्यवहारोभयानुपातिनीत्यव-
सातव्यम्। तेन निरस्तसमस्तदोषकलङ्कपङ्कं वाक्यम्
इत्थंभूतं भासं स्यात् — शिशुना (शिशोर्वा)
पयः पानाय (नित्य उपपदसमासः) गोप्रदः (पूर्वलिङ्गः :

शिशोः कर्तृत्वे इति नाविवक्षितमेव। विवक्षितमेव

स्वसुतसूनुत्वेन प्रजात इति। आशासे व्याप्रियमाण
नया सन्तोक्ष्यति स्वान्तं सतामित्युपजिह्रियते वचः।
उपसर्गार्थचन्द्रिकायाः प्रथमखण्डस्य प्रकाशितस्यायो-
पान्त्य व्यासाः। अपि नामायं दृग्गोचरतामितः स्यात्?
नेति चेदवश्यं दृग्गोचरीकरणीय इति प्रार्थयमानः
कुशलं चात्रभवतामाशंसमानो भवत्पितृचरणानां
मत्सुहृदां च अनुग्रहमीहमानो विरमाम्यहं
विदां विधेयश्चारुदेवः शास्त्री ॥

अन्तर्देशीय पत्र कार्ड
INLAND LETTER CARD

Shri B. H. Padmanabha Rao
Atmakur P.O.
Karnool Dist.
(Andhra Pradesh)

पिन PIN

तीसरा मोड़ THIRD FOLD

इस पत्र के भीतर कुछ न रखिए NO ENCLOSURES ALLOWED

प्रेषक का नाम और पता :— SENDER'S NAME AND ADDRESS :—

Prof. [illegible]
3/54, Roop nagar
[illegible]

पिन PIN

दूसरा मोड़ SECOND FOLD

देहलीतः
२२।८।७५

अयि प्रणयिन:

अद्याह: कतिपये सम्प्राप्तस्ते भाव-
कस्य प्रीतिदलस्य । गुरुतर कार्यान्तर वैयग्र्यं चात्र
प्रतिवचसमन्तरायोऽभून्नोपेक्षाऽनादरो वेति मर्षणीयो
व्याक्षेप: । यथात्र भवतामाचार्ये व्यवसायबुद्धिस्तथा
ममापीति साक्षरता उभयोस्तत्र विप्रतिपन्नावनवद्यव-
साय: । अवश्यवक्तव्यमिति प्रयुक्त: अयं चित् प्रविरलां
विसृजामि वाचम् । जन्म इत्यस्य सिद्धा [illegible]
ई इति प्रक्रियैव निर्दूषणा भाति । तत्रोपपन्नयत्नेना:-
पमन्तादु णिलोपस्य व्यावृत्तिचर्चाको दुर्धर: । तथा सति
टै स्नो लोपो दुर्लभ: । णेरपि [illegible] डिति लोपो
पि । डिति लोप: क: । कृतेऽपि णिलोपे [illegible]
डि [illegible] इत्यनेन [illegible] भविष्यति । इदं मा-
चार्यै: [illegible] समनुचितम् । एवं सति णिलोप-
विलोप:, तस्मिन् [illegible] विलोपो न भविष्यति, [illegible]
[illegible] प्रवृत्ते: ([illegible] चित्
परि [illegible])। [illegible]
प्रसङ्ग: । [illegible] तत्र मितां ह्रस्व इति
वृद्धौ [illegible] ह्रस्वत्वम् । सर्वमिदमालोच्य [illegible]-
[illegible] एव परिग्राह्यो भवतामनुकूल इति मम भाति ।
[illegible] इति । विप्रति-
[illegible] इति सम्प्रार्थयमानो चिर-
[illegible]

[illegible]

-
त्र
ो
र
ब-
ं
ने
: -
ि
े
ां-
ोप.
े
वत्
े
र-
।
ः

अन्तर्देशीय पत्र कार्ड
INLAND LETTER CARD

Shri

B.H. Anandathirtha Sharma,

Sri Panini Mahavidyalaya

ATMAKUR (Po)

(Kurnool Dt) (A.P.) 518422.

पिन PIN 5 1 8 4 2 2

तीसरा मोड़ THIRD FOLD

इस पत्र के भीतर कुछ न रखिए NO ENCLOSURES ALLOWED

पते में पिन कोड लिखें WRITE PIN CODE IN ADDRESS

प्रेषक का नाम और पता :— SENDER'S NAME AND ADDRESS :—

Prof. Charudeo Sastry. M.A.M.OL.

"Surabhi" 3/54. Roop. Nagar. Delhi-7

पिन PIN 1 1 0 0 0 7.

अस्पृश्यता ईश्वर और मानवता
के प्रति अपराध है।
UNTOUCHABILITY IS A CRIME
AGAINST GOD AND MAN

यहाँ काट कर खोलिए TO OPEN CUT HERE

पहला मोड़ FIRST FOLD

देहलीतः
८।१२।८६

अभ्यर्च्यायुष्मन्तः,

पत्रं भावत्कमचिरं निवेदितं च वृत्तम्। अत्र च त्रिचतुरान्मासानमन्दोऽस्मीति प्रतिवचसि मन्दाये। जरो मे शरीरसारः। स्वल्पयति चाशीर्यं चेष्टा अपि मेऽनीशस्य सहसोद्भवन्ति चिरं च क्लिश्नन्ति माम्। कथं कथमपि जीवामि। प्रस्तावतरङ्गिणीस्थे प्रयोगे सन्दिहते भवन्तः, पुस्तके क्वचित् सङ्गृहेऽन्तर्हितं न स्यात् उपलभ्यत इति तत्र विषये न किमपि वक्तुमीशे। किमावां गुणोऽस्ति याम् इत्यत्र प्रयोगविमर्शेऽमैव तृतीया श्लाघ्या समाख्यातुम् इति तुल्यो गौरवदोषः। अनुचर इति परिचारके ध्रुवं रूढः, तदर्थं मित्रं वा नेष्यते न मे मतम्। इत्यलं बहूक्तेति विरमामि।

भावत्कोऽहं
चारुदेवः शास्त्री ॥

15 भारत INDIA

जवाबी REPLY

Shri B. H. Ananda tirtha
Sharma
Shri Panini Mahavidyalaya
Atmakur P.O. 518422
(Dist. Kurnool)
(A.P.)

पिन PIN

३५४ ग्रीन्पार्कनवनगरम्,
देहलीराजधानीतः
२९।१०।६२

आयुष्मत्सु आनन्दतीर्थशर्मणि:।

इतः षष्ठेऽह्नि भवद्भिः
प्रहिताः पञ्चपञ्चाशद् राजती मुद्रा मया सम्प्राप्ताः। पुस्तक-
प्रेषणं च त्वरितमपेक्षितम्, पुस्तकबन्धनशिल्पिना तु
मयैतद्देशे बहूनि पुस्तकानि न प्रैषि, यं जनं प्रकाशका-
ङ्क्षितं ~~[illegible]~~ द्वारीकृत्य बन्धनकार्यं तत्रापि सोऽपि
जयपुरं प्रस्थित, नवम्बरमासि द्वितीये दिवसे च ततः
प्रत्यावर्तिता। तेन ततोऽर्वाक् पुस्तकसम्प्रेषणं न
सम्भवतीति कांश्चिद्दिनानतिरिक्तं विलम्बं सहध्वमेव
इति प्रार्थये। नाग व्यवहारादर्शे द्वितीयोऽनुबन्धो तेन
सह प्रेषयितव्योऽस्तीति विनिवेद्य विरमामीह विदां वि-
धेय रत्नाकरदेवः शास्त्री॥

देहलीतः
९।६।६९

प्रियमित्र आयुष्मन्त आनन्दतीर्थशर्म्माणः,

भवत्पत्रोप-
लब्ध्यनन्तरं अकालहीनमुत्तरयामि चेतोनिर्वृतये। इह स्वस्ति
वर्ते, त्वत्रापि च भवन्तः सर्वे वर्तन्तामिति परेशं प्रार्थये।
उपसर्गार्थचन्द्रिकायास्तृतीयः खण्डः परिसमाप्तप्रायः
स शीघ्रेण कृतसन्धिः प्राकाश्यमेतेति प्रतीमि। चतुर्थ-
खण्डोऽपि मुद्रणार्हो मम वर्तते। केवलं प्रकाशकस्यैव [illegible]।
पञ्चमः खण्डः सम्प्रति मुद्रणार्हतामुपनीयते, तदर्थं प्रत्यहं
सप्त होरा अष्टौ वा होरा लेखने यापयामि। वयोऽपि मे
शरीरसादः, उत्साहस्तु नावसादमेति। कार्यशक्तिस्तु
पूर्ववदक्षीणा। एष परो भगवतोऽनुग्रहः। एतमेव नित्यं
मानसे स्मरामि, इदमेव मे परमवलम्बनम्।

भारत INDIA 15

Shri B. H. Anandatirtha
sharma,
Shri Panini Maha vidyalaya
Atmakur P.O Pin-518422
(Kurnool Dist)
(A.P.)

पिन PIN

पितृचरणेष्वस्मत्सुहृद्गणेषु नति-
ततयो मे निवेद्या इत्युक्त्वा विरमति
विदां विधेयः वासुदेवः शास्त्री।

च्चारणे तु प्रमाणमास्तीति नो
लभ्यते किमत्र प्रमाणम्। भैरव्यादिषु
शब्दरत्नटीकासु क्वचिदप्युच्चारण-
क्रमव्युत्क्रमः शङ्काबीजत्वेन न
वर्णित इत्यस्यास्मदुक्तमेव समर्थयते।
नातः परं वक्तुं क्षमे। प्राकृते हकार-
मकारादीनां विपर्ययेणोच्चारणं
भवतीति सर्वेऽपि वयं प्रतिपन्नाः, परं
न तत्प्रकृतशङ्कापनयनायेत्यलम-
तिरिक्तेन वचःसन्दर्भेणेति विरमति
विदां विधेयश्चारुदेवशास्त्री॥

पोस्ट कार्ड
POST CARD
केवल पता
ADDRESS ONLY

INDIA

Pandit B. H. Padmanabha Rao,
Shri Pānini Mahāvidyālaya,
Atmakur P.O.
(Dist. Kurnool)
(A. P.)

देहलीतः
१२।६।६०

अयि सतां सत्तमाः,

सनमस्यं विज्ञापयामि विसृष्टो ऽनवधानेन मया ज्ञोच्चारविषयः, अत्र विषये चेदं ममाभिप्रायः — ज्ञत्र योगे तथोच्चारणमात्रमिति शब्दरत्ने स्थितस्य वाक्यखण्डस्य ग्ञोरित्येवं विपर्ययेणोच्चारणे तात्पर्यमित्युत्प्रेक्षामात्रं कस्यापि प्रेक्षावतः। तथा सति श्रुतत्वेन तज्ज्ञानमितीष्टरूपाभिव्यक्तिप्रसक्तेः। इष्टं चेतद्रूपं तस्य च शब्दरत्नकारस्य च। विपरीतोच्चारणे तत्र ज्ञानमित्यापद्येत। मम त्वेवं भाति यथा ऽन्यत्र संयुक्तयोर्वर्णयोर्व्यपवर्गेण श्रुतिर्भवति न तथा ज्ञयोः संयुक्तयोः, किन्तर्ह्यत्यन्तं संमिश्रो ध्वनिरुपजायते वर्णान्तरमिदमिति व्यामोहस्य जनकः। अतएवं प्रतीत्येनो-

अस्यैव द्वितीयः कृत्तद्धितव्याख्यानो भागोऽपि
प्रणीतप्रायो वर्तिष्यते मयि। सोऽपि हेमन्ते प्रकाश-
तामियादित्येवं कल्पये। ममाऽनूदितव्याकृतं नवा-
ह्निकं महाभाष्यं ~~प्र~~ तिमिरपि द्विनयनयोरयनं
नीतं स्यादित्यपि संभावये। [illegible] वत्सरो
ऽस्य प्रकाशितस्य। अन्तराऽन्तरा स्वस्य
स्वानां च कल्यताविषये मोदः। प्रवर्जितैर्यै[illegible]
सम्प्रार्थ्य विरमति विदां विधेयः,

चारुदेवशास्त्री॥

To

Pandit Shri Padmanabha Rao,

Shri Panini Mahavidyalaya,

Atmakur P.O

(Kurnool Dist.)

(A. P.)

३।२८ रूपनगरात्
देहलीस्थात्
२५।१२।६९

श्रिये मानभाजः पण्डितप्रवेकाः,

अहर्गणादूर्ध्वं भावत्कं दलमाप्य साक्षात्कार इवाभूत् सुहृद्वराणाम्। अवाप्यापि दलं प्रतिवचने ऽचिरायितेति मर्षणीयो मे मन्तुः। इतोऽर्धमासद्वये गेहिनी मे देवभूयं गतेति तद्वियोगशोकशङ्कुना विद्धोऽपविद्धव्यापारः सर्वस्मिन्कृत्येऽरतिः कञ्चित्कालमस्थाम्। ततो विरते शोकावेगे यथापुरं शास्त्रचिन्तायां मन्दमन्दं व्यापृतोऽस्मि। शास्त्रव्यसनिता च न जहाति मामिति नितान्तं तान्तोऽपि किञ्चित्प्रणयामि वाङ्मयम्। अद्यत्वे व्याकरणचन्द्रोदयस्य प्रणीयमानस्य कारकसमासनिरूपणः प्रथमः खण्डो मुद्र्यते जुलाईमासान्ते च पक्वमुद्रणः प्रकाशमेष्यति। तमिमं निचाय्य सम्मंस्यन्ते सुहृद्वरा इति बाढं विश्वसिमि।

इति वर्तमानः कविः, द्वादशेऽपि तत्रार्थे
कठिनशब्दं प्रयुञ्जानो न प्रामाण्यमियात्
ततः प्रभृति संव्यवहारे लुप्तप्रचारा
संस्कृतं वाग्वागन्तर संसर्गविशेषेणा-
नल्पं विपर्ययमाप। आशासेनेन
व्याकरणेन सन्तोषसन्त्युदारदर्शिनो मे
सख्यायः। ब्रह्मशब्दस्य वर्णानुपूर्वी-
व्यतिक्रमेणोच्चारस्तु सर्वथाऽनुपपन्न
इति पश्यामि। मकारस्य हकारात्
पूर्वमुच्चारणे कमपदेशं ते तर्कयन्तेऽ
न्वेषणयः? अन्तरान्तरा कुशलोदन्तमहम-
वेक्ष इति नवं निवेदयन् विरमन्ते विद्वं विधेयस्त्वदीय
शास्त्री॥

पोस्टकार्ड
POST CARD
साथ का कार्ड जवाब के लिए
THE ANNEXED CARD IS INTENDED FOR THE REPLY
केवल पता
ADDRESS ONLY

POSTAGE
INDIA
५ न. पै.

Pandit B. H. Padmanabha-Rao Shastri,
Atmakur P.O.
(Kurnool Dist.)
(Andhra Pradesh)

दिल्लीतः
२२।२।६३

अयि पण्डिततल्लजाः,

सनमस्यं विज्ञापयाम्यत्र भवतां लेखमितोऽहः कतिपये व्यासाद्यं प्राहैष्यञ्च। कठिनशब्दमधिकृत्यं यदहमनुवादकलायामन्यत्र च न्यबध्नां तत्सन्निबन्धनम्। अर्वाक्कालिकासु कासुचन कृतिषु दुष्करार्थे तत्प्रयुक्तिर्न मदन्तं बाधते। Wörterbuch इति समाख्ये कोषेऽपि तदर्थं स्याद्दूरे:। आप्टेमहाशयेनापि काव्यनाटकादिषु प्रथितेषु स्रोतःसु नोपालब्धमिति न न्यासि। आस्तां तावत्पञ्चदशो वर्ष-

15 भारत INDIA

जवाबी
REPLY

Shri

B.H. Anandattirtha Sharma

Sri Panini Mahavidyalaya

ATMAKUR

(Kurnool Dt) Andhra Pradesh

पिन PIN 518 422.

३।५४ रूपनगरात्
देहलीस्थात्
१२।१२।८१

आयुष्मन्तः प्रिया आनन्दतीर्थशर्माणः

इतः कतिपयेष्वहःसु

भावत्कं दलमविरमवेदिषं च वृत्तम्। भावत्कीं पृच्छां यथामतीयमुत्तरयितुं प्रक्रमे — सूक्तस्यास्य नारायणस्यैव परत्वम् इति वाक्यं सदोषं पश्यामि। इदं सूक्तं नारायणमन्त्रपरम् इति विवक्षितेऽर्थे समासवाक्यार्थयोरैक्ये वा युज्यते नारायणमन्त्रं परं प्रधानमस्येति विग्रहे। किन्तु सूक्ते नारायणस्यैव परत्वं मन्त्राणामिति शक्यं वक्तुम्। सूक्तान्नारायणाच्चाभिन्नात् षष्ठी नोपपद्यते। अन्यथा सूक्तस्येति षष्ठी परत्वमित्यनेनापि सम्बध्येत, तेन सूक्तस्यापि परत्वं (प्राधान्यं) गम्येत, अनिष्टं च प्रसज्येत। एतदनिष्टप्रसक्तिवारणायाऽवश्यं सूक्तात् सप्तमी प्रयोज्या। नारायणात् षष्ठी सर्वथा सूपपादेति मन्ये इत्यलं विस्तरेण।

भवतः स्निग्धो बन्धु-
श्चारुदेवः शास्त्री ॥

पोस्ट कार्ड
POST CARD

केवल पता
ADDRESS ONLY

INDIA
6 nP
६ न.पै
भारत

Pandit B. H. Padmanabha Rao

Shri Panini Mahavidyalaya

Atmakur P.O.

(Kurnool)

(A. P.)

३।५४ रूपनगरात्
देहलीराजधानीनगरात्
८.६.६७

प्रिय मान्यमहोदयाः सादराः।

अद्य चतुर्दशो मासः कु-
स्य दत्तस्य ममादिष्टगतस्य। भवन्तं वाचो तव मदीक्ष
माणाः कालं नयन्ति। परं किं करवाणि। तत्र
विषये विमर्शं प्रवर्तयितुं कालं नाकामि। अस्पष्टं
मे स्वान्तम्। एकं दैव ह्रीच्छिद्रियतमतरं वत्साः प्रीति
प्रतिपन्तु सन्तु इति विनीतं विनिवेद्य विरमाम्यहं।
विदां विधेयश्चारुदेवशास्त्री॥

जवाबी
REPLY

To

Shri Pandit B. H. Padma-
nabh Acharya
Shri Panini Mahāvidyalaya
Atmakur – 518422
(Kurnool Dist.)
(A.P.)

पिन PIN

देहलीतः
१८-१०-७७

अयि प्रियाश्शास्त्रिणः

इतः कतिचिद्दिवसेषु भवद्भिः प्रेषितं पत्रमद्यापि प्राप्तं च यथावद् अवेदि। व्यस्तत्वम् इत्येव साम्प्रतम्, शरीरस्थितिश्च स्वस्थास्ति दुःसमाधानं चेति नात्र बहु वक्तव्यमस्ति। निबन्धुरेव प्रमादो ऽस्मन्मनो-निरस्मानि न लिखितीति खेदः। आशासे ऽत्र भवन्तः सर्वथा स्वस्तिमन्तः, अस्मत्स्नेहसमादरयो र्भाजनम् भवतां तातपादा अपि मनःशरीरयोः स्वास्थ्यमविकलं भजन्तीति बलवदाशंसे। अन्तरान्तरा स्वः कुशलोदन्तो दायि इति सम्प्रार्थ्य विरमाम्यहं नितरां निवेदयन्

वासुदेवशास्त्री॥

पोस्ट कार्ड

POST CARD

नत्थी का कार्ड जवाब के लिए

THE ANNEXED CARD IS FOR THE REPLY

केवल पता

ADDRESS ONLY

Pandit B. H. ~~Atmananda~~ Ananda-
tirtha Sharma,

Shri Panini Mahavidyalaya,

Atmakur (P.O.)

(Dist. Kurnool)

(A.P.)

स्वस्ति । [illegible]ली तश्चारुदेवशास्त्री प्रेयांसमायुष्मन्त-
मानन्दतीर्थशर्माणं माशीराशिभिः संवर्ध्य सस्नेहाति-
रेकमेवमनु[illegible]दर्शयति — अद्य प्रायेण मासो व्यगाज्जीव-
कस्य ते पत्रस्य सम्प्राप्तस्य । तत्रोद्वेगकर उदन्तो वि-
न्यस्तोऽभूत् पितृचरणास्ते विषमेण ज्वरेणाक्रान्ता
इति । कार्यान्तरव्यापृतमता मयका नापारीदानीं या-
वत्पत्रेण वृत्तं जिज्ञासितुम् । क्षुभ्यति मे चेतः । शुभो-
दन्तं प्राक् सम्प्रेष्य शुभं पुना भवता प्रशमनीयो ममाति-
ङ्कुरश्चित्तसंक्षोभः । कच्चित्कुशलिनः स्वस्तिमन्तो मम
सखायश्चाचार्याः संप्रीतव्रताः ।

तत्र समाचारानायासेन नात्मा कदर्थनीयः,
अपशंका स्वामी भवन्तीत्यवसाय मुवा-
सिकमा स्थैर्यं विपश्चितेति पश्यत्यवसानः
कथं वा भवतस्तातपादाः परमा मत्सरवाः
पश्यन्ति? आशंसे मानुकाय भवतः,
कुशलौ च सर्वस्याऽऽवनायस्य। अन्यतरा
न्तरा कुशलोदन्तः सम्प्रेष्य इति निवेद्य
विरमति विद्यां विधेयः श्री

विषया'लि'स्तिकुन्तां — वासुदेवशास्त्री॥
आगच्छचरणा इत्ययं
भावत्कोऽन्यतम उपस्कारमर्हति। न हि स्थैर्या-
स्तिकुन्ते किन्तर्हि कश्चिदन्यः स्थैर्ये कुतिकुते।

पोस्टकार्ड
POST CARD
जवाबी
REPLY
केवल पता
ADDRESS ONLY

ATMAKUR KURNOOL
DELY
KURNOOL

भारत
INDIA
10 P
10 प

Shri
B. H. Anandatirtha Sharma
Shri Panini Mahavidyalaya
ATMAKUR,
Kurnool Dt)
(A.P)

३।२४ देहलीस्थाद्रूप-
नगरात्
१८।८।७२

प्रिय विद्याविनयरत्नवित मत्स्नेहातिरेकभाज आनन्दतीर्थ-
शास्त्रिणः, अलाभि भवत्कं दलम्, प्रासादि च। यत्सत्यं
सुरसरस्वत्यामेवं प्रसक्तं सदसद्विवेचनचणं भवन्तमुपलभ्य
किमपि तुष्यति ममान्तरङ्गम्। चिरमनुगतः पन्था इति च
सन्तुष्यति तराम्। कर्तरि युज्यमानमिति दुःखमाधानम्।
युजेर्दिवादित्वकल्पनाऽपि कल्पनापोढा, तस्य चौरादिकत्व-
स्यैव प्रसिद्धेः। वदति धातुगण इत्यस्य न प्रकृतोऽर्थो विवक्षितः।
दिवादित्वकल्पनेन नेदं धात्वन्तरं भवति, स चादिषु पठितस्यैवा-
ऽनुवादः स्यात्। अन्यत्र प्रयोगादर्शनात् पुराणेषु क्वचिद् दर्शना-
दपि पाणिनीयानां नेदं परिग्राह्यं भवति। स्तोत्रेषु माहात्म्योप-
वर्णनेषु च बहुशश्च्युतसंस्कृतिकान्युपलभ्यन्ते पदानि।

मन्दिः सन्दिः। नातः परं वक्तुमीशे।
अवजानातिना तिरस्कार एव रूढः।
रूढिश्च नानादृत्या भवतीति विदितं
बहुविदां सज्जनानाम्।

अन्तराऽन्तरा स्मरणेनानुग्राह्योऽयं जन
इत्यभ्यर्थयमानो विरमाम्यहं विद्वच्चरण-
पङ्कजचञ्चरीकश्चातदेवशास्त्री॥

भारत INDIA 6P 6पै

4P ADDRESS ONLY

Pandit Shri Padmanabha Rao,
Acharya,
Shri Panini Mahavidyalaya,
Atmakur P.O.
(Dist. Kurnool)
(Andhra Pradesh)

देहलीतः
२३.८.६८.

अयि मानभाजः सस्नेहम्।

विचिन्त्य प्रश्नमस्य भवतो विमृश्ये-
ऽर्थे भूयोऽपि स्वं दर्शनमुपन्यस्यामि। अपपूर्व एव जानातिर-
पलपनमर्थमाह नोपसर्गान्तरपूर्वो नाप्यनुपसर्गः। शब्दशक्ति-
स्वाभाव्यात्। यद्यपि सूत्रादिषूपसर्गपूर्वतैव नियम्यते
नापोपसर्गपूर्वता, तथापि लक्ष्ये अपपूर्वतैव दृश्यते। सूत्रकारेण
भगवता राधो हिंसायामित्यनेन शासनेन हिंसार्थकस्य राधे लि-
ट्येत्वाभ्यासलोपौ विहितौ तथापि केवलस्य तौ न भवतः, किन्त्व-
पपूर्वस्यैव, अपेनैव तत्र हिंसार्थस्य द्योतनात्। अप उपसर्ग
एव तद्धातुयोगे हिंसार्थं वाच्योऽभिव्यङ्क्तुम्। एवम्प्रकृतेऽपि। श्री-
वादिराजस्वामिनाम् अपजानते इति प्रयोगे तु ममायमभ्यूहः—
यच्चेतरे एतद्देशजाः पदे वर्णान्पूर्वं वकारं प्रयुञ्जते तत्राचार्या
बहुशो वकारं प्रयुञ्जाना दृष्टाः। वाक्यपदीयमूलवृत्त्योः परिष्क-
रणप्रसङ्गेन मया मातृकाग्रन्थे अनेकत्रेदमलक्षीति आदेयं श्री-

भद्रि: स्वस्ति:। अत: परं वक्तुमीशे।
अवज्ञानात्मक तिरस्कार एव रूढः।
रूढिश्च ज्ञानादृत्या भवतीति विदितं
बहुविदां सज्जनानाम्।

अन्तराऽन्तरा स्मरणेनानुग्राह्योऽयञ्जन
इत्यभ्यर्थ्यमानो विरमाम्यहं विद्वच्चरण-
पङ्कजचञ्चरीकः श्यामदेवशास्त्री॥

भारत 6 P. INDIA 6 पै.

भारत INDIA 4 P.

Pandit Shri Padmanabha Rao,
Acharya,
Shri Panini Mahavidyalaya,
Atmakur P.O.
(Dist. Kurnool)
(Andhra Pradesh)

सविवृतिर्हिन्द्यनुवादो मया प्रणीतो
मुद्रापितश्च। स सम्प्रति बन्धनमपेक्षते
मन्ये ऽचिरेण प्रकाश्यं याता। प्रकाशित
मात्रमेतं भवद्भ्यो बहुविद्भ्यः प्रीति-
दायं प्रहेष्यामि प्रार्थयिष्ये चानुकूल-
मूल्यमयं ग्रन्थः परीक्ष्यतामिति।
कुशलमिहात्र भवतः सर्वथा कुशलिन
आशंसमानो विरमाम्यहं निदां विधेय

चारुदेवशास्त्री॥

पोस्ट कार्ड
POST CARD
केवल पता
ADDRESS ONLY

भारत INDIA 10

Pandit
Shri B. H. Padmanabha-
rao
Shri Panini Mahavidyalaya
Atmakur P.O.
(Dist. Kurnool)
(Andhra)

३।२४ रूपनगराद्
देहलीस्थात्
२६. ७. ६८

अयि वाग्योगविदान्तवणीयः सखायः

प्रीतोऽहं कतिपयेष्वस्म ~~...~~ इदं भावत्कं पत्रं सनमस्यं विशालपया-
न च न चिरादपश्या-
रं तदर्थं प्रतिवचनमिति क्षमयेऽत्रभवतः । तत्र पत्रद्वयेऽत्रभव-
द्भिरुपन्यस्ते पूर्वे पत्रे येन मे जिज्ञासितं इति विनीतव द्विरयापया-
मि । अपह्नवे स इति हि शोभात्वार्दरियस्मैपदे प्राप्ते विधिरिति
वृत्तिः । नेदं सूत्रं कर्मणि प्रयोगेऽपह्नवेऽर्थे तङं विधत्ते । कर्त-
रि प्रायेत्वनुपसर्गाज्ज्ञ इति विकल्पान्तरं स्मर्यते । किं च ।
अपपूर्वस्य ज्ञानातिरपह्नवे प्रयोगमवतरन्दृष्टो नानुपसर्गा-
न्तरोपसृष्टः । विपूर्वस्य क्वचिदर्पितमर्थमाचक्षाणो न
दृष्टपथं गतः । आभिधानिका अपि तस्य तदर्थं नाहुरिति
नास्माभिरभिमतौ चित्रं निर्मितिस्तवास्य इत्यलं विशेषकुमवा-
दयैर्बु । नवाह्निकस्य (आदितो नवानामाह्निकानाम्) भावयः

पोस्ट कार्ड
POST CARD
जवाबी
REPLY
केवल पता
ADDRESS ONLY

73

Shri B. H. Ananda Tirtha Sharma,
Shri Panini Mahavidyalaya
Atmakur P.O.
(Dist. Kurnool)
(A.P.)

३।५४ रूपनगरात्
देहलीस्थात्
२६।६।६३

आयुष्मन्तोऽनन्तवर्णिय:।

इतो हि: कतिपयेषु भवद्भि: सद्भि: चरितं दलमविदमवेदिषं च वृत्तम्। निपुणमुद्भावितमव्ययेषु नह्ञां शब्दो मयो पैक्षीति। न जाने किं कुतेयमपेक्षा भूत्। सत्यमव्ययपरिगणनं ममेष्टं न तु निदर्शनमात्रम्। एवं सत्यस्याव्ययस्य परिहार: कस्मा अपि खेदाय भवति। आशंसे भवतां तातचरणा अस्मत्सखा: शास्त्रिवर्या: सर्वथा स्वस्तिमन्त इति। अर्हन्तिस्ते ममार्हणीयां वेद्या:। अन्तरान्तरा कुशलोदन्त: प्रेष्य इति प्रयुञ्जानो विरमति विदां विधेयश्चारुदेव: शास्त्री।

मुद्रणयन्त्रस्थे कारिके ते इति
प्रवृत्तिर्हि वैद्यनाथस्वामिभिरस्माभिः श्रुता-
पाम | उपसर्गार्थचन्द्रिकां तु
निरावरणापि नाद्यापि समाप्ति-
मेतीति कथितवन्तो मे | अनन्तरं
तासां मूल्योपि स्वरूपादकस्य नाम-
प्रेषणेनानुग्राह्योऽयं जन इति
प्रार्थयते विदां विधेयः

वासुदेवनरसशास्त्री ||

पोस्ट कार्ड
POST CARD
साथ का कार्ड जवाब के लिए
THE ANNEXED CARD IS INTENDED FOR THE ANSWER
केवल पता
ADDRESS ONLY

INDIA
6 nP भारत ६ नये

B. H. Padmanabha Rao

ATMAKUR
Kurnool Dt.
(Andhra)

[illegible]

प्रार्थ्यते विदां विधेयः

वासुदेवशास्त्री ॥

पोस्ट कार्ड
POST CARD
साथ का कार्ड जवाब के लिए
THE ANNEXED CARD IS INTENDED FOR THE ANSWER
केवल पता
ADDRESS ONLY

INDIA
6 nP
भारत
६ नये

B. H. Padmanabha Rao

ATMAKUR
Kurnool Dt.
(Andhra)

अहियापुर
पो० ग्रा० उडमड,
जिला होशियारपुर
(पंजाब)
२०. ९. ६५

अयि पण्डितवर्य्याः,

महतीनां मुदामवसरो यदद्य भवत्कं पत्रमापीति, प्रभुवरस्य प्रसादो मयि यदहं स्वस्थोऽस्मीति। अद्योपचतुरान्मासाननन्तरमिमं ग्राममावसामि, मासाद्वयं चातिरिक्तमत्रैव निवत्स्यामि। ततो देहलीमाविवत्स्यामि। अथ च महाभाष्यनवाह्निकस्यानुवादविवरणे पर्यवसित-प्राये केवलं द्वितीयं पर्यालोच्यं, तेन मार्चमासे

पाठशालिनीं पञ्चशती व्याख्यानमयं ग्रन्थो
मन्ये जनवरीमासस्यान्ते मुद्रणार्हता-
मागा । ततो मासचतुष्टयेन यावत्सित-
मुद्रण: प्राकाश्यमेता । एतावन्तमनेहसं
प्रतीक्ष्योऽयं प्रतीक्षो विचक्षणैरिति
प्रमना: प्रवेदयन् विरमति विदां विधेय-
श्चारुदेवश्शास्त्री ॥

भारत INDIA

कार्ड CARD

Shri B. H. Padmanabha Rao,

Shri Panini Mahavidyalaya

Atmakur P.O.

(Dist Kurnool)

(Andhra Pradesh)

पिन PIN

३।२४ दोलीत्याद्रूप-
नगरात्
६।११।७४

आयुष्मन्तः पद्मनाभशर्म्मणः,

इतः लब्धाहे ऽभवतां स्नेहसमादरातिरेकपिशुनं मितसारसन्दर्भं लेखमासीवदमूल्यं च प्रासादम्। सुप्रियरूसन्तो व्याकरणचन्द्रोदयस्य मत्कृतेः खण्डोऽपि सम्पूर्णा निखिलेना प्रतीयतेति प्रियं मे। अस्य मे यत्नस्यार्थवत्तामन्तरेण कथं पश्यन्ति विशेषज्ञाः श्रीमन्त इति जिज्ञासे। अपि नामेमां कृतिं पितृचरणा वेदिताः, उतास्याः कमप्येकदेशं ते वेदितारः श्राविताः? अनल्पोऽनन्यसमैर्योर्थैः पूर्वैरस्पृष्टपूर्वैः संगृहीत इति वेदमात्मसम्मानमात्मकवचनम्। अथ त्वे चिरोपक्रान्तप्रणयनाया: कृतिषु स्वासु यत्तत्र प्रख्यापितायाः उपसर्गार्थचन्द्रिकायाः परिसमापने ऽनारतं प्रयस्यामि। संस्कृतेनोपनिबद्धः पत्र-

गमेऽपि स्वप्रत्यय इत्यत्रैव पूर्वपदार्थ-
बाहुल्यान्नियोगेन बहुवचनान्तता स्या-
त्त्रिजगत्य इत्येवं च स्यात् तन्त्रेण प्रयोगः
स्यान्न चासौ दृश्यते। तेन वाक्येऽसत्त्वा-
त्समासेऽपि तस्याभाव एव युज्यते वक्तुम्।
वाक्यमत्रावल्याः कण्ठे करणं कथं नु
साध्येतेति पृच्छात्र भवतां विदुराणाम्।
अहं तु मन्ये यदि नाम छात्राः पदपदार्था-
वगमपुरःसरमिमानि वाक्यानि गृह्णीयुः
सकृच्चान्योन्यं पृच्छेयुस्तादृशीयत्कर्मेषां
स्मरणं धारणं च स्यात्। अपि वाऽऽवृत्त्या
पाठ एव कल्पिष्यते तस्मा [illegible] इति सूचमनी-
त्रिक्रया यत्किञ्चिदुदीर्य विरमति विदां विधेयश [illegible]

पोस्ट कार्ड
POST CARD
केवल पता
ADDRESS ONLY

Pandit B. H. Padmanabha Rao,
Atmakur P.O.
(Dist. Kurnool)
(Andhra)

नेपाली खपरा, वाराणसी
C/o
श्रीमोती लाल बनारसीदास
प्राच्यपुस्तकविक्रेता
२३. १०. ६०

अयि समभ्यर्चनीय चरणाश्शास्त्रिण:

। सनमस्यं विज्ञापयाम्यविदं भावत्कं पत्रमवेदिषं च वृत्तम्। अद्यत्वेहं वाराणसीमावसामि किञ्चिदधिकान् मासान् कुतीश्चापि कियतीश्च निर्मितस्मान: । हायनत्रितयं चेह विवत्स्यामि । विरला एव भवादृशा: कारुणिका इति मोमुदीति चेत: । त्रिजगतीति पदं यथा भवन्तो निर्ब्रुवन्ति तथैवास्य साधुत्वमभिनिर्वर्तते । नात्र समाहारद्विगुत्वं सम्भवदुक्तिकम्, न च दिक्संख्ये संज्ञायामिति समानाधिकरण: समास उपपत्तिमान्भवति। नायं संज्ञाशब्द:, कथञ्चित्सञ्ज्ञाभ्युप-

मासेनार्धमासेन वाऽध्यक्षपदाद्
निवर्तयिष्यते विशेषज्ञसमित्या । ममा-
त्मजोऽपि तत्पद प्राप्तिकाम्यतमः । स
यथा तत्र समर्थः समीहितः स्यात्तथाऽऽ
श्रीमद्भिः संवर्धनीय इति याचे ।
इह सर्वं कुशलम्, तत्र भवतां सौख्यं
सन्ततं कामयमानोऽहं विरमामि
भवदीयः [illegible] देव[illegible]शास्त्री ॥

---

17 6 SHRB
DELHI-7

-70
AM

पोस्ट कार्ड
POST CARD
साथ का कार्ड जवाब के लिए
THE ANNEXED CARD IS FOR THE REPLY
केवल पता
ADDRESS ONLY

भारत
INDIA
10 P
10 पै

Pandit Padmanabha Rao,
Panini Mahavidyalaya
Atmakur P.O.
(Dist. Kurnool)
(A.P.)

३।२४ रूपनगरम्
देहली-६
१।१।६०

प्रिय पण्डिततल्लजाः,

सनमस्यं निवेदयामीतो द्व्यहे त्र्यहे वा तत्र भवतां सकाशे व्याकरणचन्द्रोदयं नाम नूतनां मम कृतिं सत्कृतनवाह्निकमहाभाष्यविवृतिसहचरितां प्रैषयम्। आशासे कृतिद्वयीयं हस्तंगता भूदिति। अवश्यमनुग्रहो मयि भविता यदीमे कृती भवद्भिः सूक्ष्मेक्षिकया निरूप्येतां गुणदोषतश्च परिच्छिद्येयाताम्। यन्नामाङ्कितेषु पत्रेषु भवत उद्दिश्य एवं वक्तव्यं कदाचिदासीत् स मे तनुजः सत्यव्रतः शास्त्री व्याकरणाचार्यः। साम्प्रतमसौ देहली विश्वविद्यालये रीडरपदमध्यास्ते ऽस्थायिनीमध्यक्षपदवीं च।

18 4 84
9 AM
जवाबी
REPLY

Shri B.H. Anantatirtha
Sharma
Shri Panini Mahavidyalaya
Atmakur P.O. 518422
(Dist. Kurnool)
(A.P.)

पिन PIN

देहली शाखानगरात्
रूपनगरात्
२४।४।८४

आयुष्मन्तः प्रियो आनन्दतीर्थराजर्षिणः

'सार्वस्वी' मत्कृतिं रामचरितामृतम् इति नाम्नीं मम संदृश्य उपायनीकर्तुम् इच्छामि। प्रेषणव्ययस्तु भवद्भिः सह्यः। स च ३.४५ इत्यात्मको भविष्यति। स मे प्रैष्य इति प्रार्थ्यते

भवत्कृपः

वासुदेवः शास्त्री॥

15 भारत INDIA

Shri Anandatirtha Sharma

Shri Panini Mahavidyalaya

Atmakur P.O.

Dist. Kurnool

(A.P.)

पिन PIN

दिल्लीतः
२५.३.८६.

प्रेयांस आनन्दतीर्थशर्माणः

'हार्दभरभृतां भवतां पत्रमधिक-
मवेदिषं यो [illegible]। इह सर्वः कुशली जनः, भवन्तः पितृ-
चरणसंहिताः सुतरां कुशलिन इति जाने। अद्यतने वार्धको-
पादाने ऽनल्पो मे स्वादः शारीरः। नवीनमदतानु [illegible]
प्रायेण समाधियान इति मम प्रकृतिजः। वाग्व्यवहारातिशयो मे
कृतिः श्रीमतां न नीडे न भाति मना। स्वयत्नं वा चर्चनीया
तत्र [illegible] समाप्ति। वाग्व्यवहाराधिकरणाना [illegible] इदं प्रथमा
[illegible] पितृपादानां सौजन्यं स्मारं स्मारं [illegible]
[illegible] मम नमोवाकं [illegible]। [illegible] कुशलोदन्तः
प्रेष्य इति विनिवेदयन् विरमति भवतां [illegible]

·9·79
930AM

जवाबी
REPLY

B.H. Anandathirthachare
Sri Panini Mahavidyalaya
ATMAKUR (Po)
KURNOOL (dt) A.P.

पिन PIN 518 422.

ओम् बहालगढ़
२-८-७९

आयुष्मते आनन्दतीर्थशर्मणे
शुभाशीः

भवतो लेखः पत्रं च मयाधिगतम्। अक्तूबरमासाङ्के वर्षस्यान्तिमाङ्क कारणात् सम्भावये लेखस्य प्रकाशनं न स्यात्, तथापि प्रयतिष्ये। नवम्बरमासाङ्के लेखवश्यं प्रकाशितो भविष्यति।

श्रीमद्भ्यस्तत्रभवद्भ्यः स्वीयपितृचरणेभ्यो मदीयाः प्रणतयो वाच्याः। सम्प्रति तेषां स्वास्थ्यं कथं वर्तत इति विज्ञापनीयोऽहम्। आशासे तत्रभवन्तईश्वरकृपया कुशलिनः स्युः।

भवतः शुभेच्छुः
युधिष्ठिरो मीमांसकः

पोस्ट कार्ड
POST CARD
साथ का कार्ड जवाब के लिए
THE ANNEXED CARD IS FOR THE REPLY
केवल पता
ADDRESS ONLY

Pandit B. H. Padmanabha Rao,
Pandit Mahāvidyalaya,
Atmakur P.O.
Kurnool
~~(Dist. Kurnool)~~
(A.P.)

३।५४ रूपनगरात्
देहलीस्थात्
२।४।६०

अयि मानभाजः सखायः,

क्रियासमभिहारेण सम्प्रार्थिता अप्यत्र भवन्तः प्रतिवाचं न वितरन्तीति किं स्विदपराद्धाय मे रुष्यन्ति । किमथाप्युल्लाघता नासादि येन लेखनादिकृत्यायां वैकल्यमाकल्यते । अवश्यं वार्ता भवन्त इति वार्ता स्वयं देया स्वात्मजेन वा दाप्येति विनीतवदर्थयमानो विरमति चिरं चिरायशः

वासुदेवश्शास्त्री ॥

To

B. H. Anandathirtha Sharma

Shri Panini Mahavidyalaya

ATMAKUR (Po)

Kurnool (Dt) (A.P)



३।२४ रूपनगरात्
देहलीस्थात्
१७।३।२

अयि प्रेयांसः,

भावत्कस्य लेखस्येह सम्प्राप्तस्याद्य दिवसयुगाः, कार्यान्तरव्यापृतिमतो मेऽवकाशो नाभूत्प्रतिवचसः प्रेषणस्य। साध्वीयं कृतिः। केवलं विरला अत्र व्याकृतेः स्खलितयः। ता यथामनीषं मया परिशोधिताः। कच्चिदत्र भवन्तस्तातपादाः स्वस्तिमन्तः पाणिनितन्त्रे विनेयान् सम्यगभिविनयन्तो विराजन्ते। चिररात्राय तेषां कुशलोदन्तो नालम्भीति किमप्युद्विजेऽहम्। पत्रोत्तरं त्वरितं प्रदेयमिति

प्रार्थयमानो विरमाम्यहं
विदां विधेयश्चारुदेवशास्त्री॥

14.7.94.

॥ ॐ ॥

My dear and Revered Sir,

Sastangamamaskarams.

Your kind letter to hand. Thanks. Now I am sending nearly 50 letters of your most Revered father, A doyen of Sabdashastra Scholarship and a Paramakarunalu towards scholars and students, for your kind perusal and delight.

More than 400 letters of your revered father, my uncle has taken away, who is now in U.S.A, nearly Ten years ago. I shall try to get them if those letters (addressed to my father and to me with शास्त्रार्थs).

That greatest savant (your father) was very prompt in replying and

erradicating the dowbts in Shastras.

I have written these (Copied) letter in my note Book. So you please dont return these letters, or you do as you desire.

Please send one Copy of your "Indiragandhicharitamahakavyam" to me atonce by return of Post.

I entreat you to Kindly reco-mmned my name for राष्ट्रपतिप्रशस्ति and order to संस्कृतसंस्थान to send 3 Copies Proforma aplications for the Traditional type (Catagory) scholars. I shall send my श्रीगीतावीतमनुकृतिः which is ornamented with a valuable opinion of the Most revered Dr. S. Radhakrishnan, soon.

From -
Pandit Anandathirtha Sharma
Sri Panini Mahavidyalaya,
(Po) Atmakur.
(Kurnool dt) (A.P) 518 422

Now There are only 8 students here. 2 are studying महाभाष्य and others now learning प्रथमावृत्ति and काशिका along with सिद्धान्तकौमुदी and ऋग्वेदसंहिता। I am here teaching Vyakarana and my brother अप्पणाचार्य शर्मा teaching ऋग्वेदसंहिता and Vedanta. We are not having any aid from the public or the Government. We dont want.

the session at Srinagar or where
I shall be presiding.

[illegible]

पोस्ट कार्ड
POST CARD
केवल पता
ADDRESS ONLY

POSTAGE
INDIA
5 nP
५ नए पैसे

10.30AM
8.9.

Dr Satya Vrat
3/54, Rup Nagar
Delhi – 6

Dear Sri Satyavrat,

Parikh's piece on the return of Śakuntala to Kanva's Asrama was published in a journal & never as a separate booklet; he showed (or did not give) a copy which I corrected, as there were several slips. It was imitative & was too full of echo from U.R. Carita etc. In Kannada the great writer Masti Venkatesa Iyengar wrote long ago a play on this theme which was translated also into English & published in TRIVENI.
With best wishes V. Raghavan
What about you & father attending A.I.O.C

पोस्ट कार्ड
POST CARD
जवाबी
REPLY
केवल पता
ADDRESS ONLY

Sri
Dr. Satyavrat M.A. M.O.L.
Ph.D. Sastri Vyakaranacharya
Reader in Sanskrit, University of Delhi
3/54 Roop Nagar
Delhi-6

(U.P.)

॥ श्रीः ॥

Bhatpara P.O.
24 Pargs
(W. Bengal)
30.3.64.

सकलमङ्गलनिकेतनेषु

श्रीमन्तो महाभागाः

अधिगम्य भवल्लिपिं शुभां परमानन्दमवाप्तोऽस्मि।

दिनकतिपयमध्य एव भवदभीप्सितविषयं विज्ञापयिष्यामि। 'अमरमङ्गलम्' दुर्लभं जातम्। तथापि एकस्य चिदात्मीयस्य सकाशाद् ऋणरूपेण गृहीत्वा भवत्समीपे प्रेषयिष्यामि — ग्रन्थोऽयं भवदीयकार्यान्ते प्रतिप्रेषणीय इति मे सनिर्बन्धोऽनुरोधः। व्ही.पी. द्वारा प्रेरणयोग्यो विक्रयो ग्रन्थो नास्ति। प्रायो विंशतिसंख्यकानि मे रूपकाणि वृत्तपत्रेषु प्रकाशितानि, तानि नाद्यापि मुद्रापयितुं प्रभवामीति दूये। सत्वरमेव तेषां नामानि वृत्तपत्रसङ्केतांश्च ज्ञापयन् प्रनुष्यामि। तेषु मुद्रितं रूपकत्रयं भवत्करकमलगतमेवेति नितरां प्रीतोऽस्मि। भवदीयं सर्वाङ्गीणं कल्याणमाशासे।

इति
भावत्कः श्रीश्रीजीवदेवशर्मा

From:
Phone no 74687

Melkote
31-3-64

Sri Jaggu Alwar Iyengar
(Sri Vakula bhooshanar).

Dear Sir,

your letter dated 12.3.64 reached my hand only on 24.3.64 because I was out of station. Since then I was very busy in attending my guests here on account of Car festival here. I am free since yesterday. So I hope you will excuse me for the ~~reply~~ delay in replying. Comming to the contents of the letter I would like to mention that all the works you have mentioned are all written by me (Sri Vakulabhooshanan) and not by Sri Jaggu Venkatacharya as you have written.

I would like to know how you came to know about the Works - Further at present my permanent stay is at Malleswaram - B'lore and hence I request you to carry on the further correspondence to the following address - I would send the books as soon as I go to B'lore.

Yours
Jagganatha

My address

Sri Jaggu Alwar Iyengar
No 272/ IVth Cross
Malleswaram
Bangalore - 3

पोस्ट कार्ड
POST CARD

केवल पता
ADDRESS ONLY

INDIA

6 nP

OPEN ...

P.O. SAVINGS BANK

APR

To

Dr. Satyavrat. M. A.
M. O. L. Ph.D. Sastri
Vyakaranacharya
Reader in Sanskrit
University of Delhi
3/54 Roop Nagar
Delhi 6

I would like to know how you came to know about the works - further at present my permanent stay is at Malleswaram - B'lore and hence I request you to carry on the further corrs to the following address - I would send the books as soon as I go to B'lore.

Yours
[illegible]

My address

Sri Jaggu Alwar Iyengar
No 272/ IVth cross
Malleswaram
Bangalore - 3

पोस्ट कार्ड
POST CARD

केवल पता
ADDRESS ONLY

INDIA 6 nP.

OPEN ... P.O. SAVINGS BAN...

To
Sri Satyavrat, M.A.
M.O.L. Ph.D. Sastry
Vyakaranacharya
Reader in Sanskrit
University Delhi
3/54 Roop Nagar
Delhi 6

On I. G. S

12 MA
P.O. SAVINGS

To

Dr. Satyavrat,

Reader in Sanskrit,

University of Delhi,

3/54, Roop Nagar,

NEW DELHI--6.

Despatcher

S. V. University Oriental
Research Institute, Tirupati

S. V. UNIVERSITY ORIENTAL RESEARCH INSTITUTE.

TIRUPATI.

(Andhra Pradesh)

R. O. C. No. 19/RI/63

Dated 10--3--...1964.

Dear sir/madam,

With reference to your P.C. dt. 5-3-1964, I am to inform you that the play in question which appeared in the Volume XIII, 2 .1962 of the Sri Venkateswara Oriental Institute journal was the publication of T.T. Devasthanams. Hence you are requested to contact the Executive officer, T.T. Devasthanams, Tirupati.

K R Sreekrishnadum

ASST. DIRECTOR.

to bring out in print as early as possible.

Thanking you,

with regards

Yours sincerely

M.S. Nagarajan

पोस्ट कार्ड

POST CARD

केवल पता

ADDRESS ONLY

POSTAGE

DELHI-6

17 8 61

DELHI-6

Dr. Satyavrata Sastri, M.A.

Vakaranacharya. MOL PhD

Department of Sanskrit

University of Delhi

New Delhi.

Sahityalankara Kavibhushana
Dr. K.S. Nagarajan, BSc, PhD.

ಶ್ರೀ

11. 4th Cross. Road
Wilson Gardens
Bangalore-2.

16th Aug. 1961

Dear Dr. Satyavrata Sastry,

I am in receipt of your kind letter of the 12th inst. and thank you very much. It is indeed very kind of Prof. M. Ramakrishna Bhat to have spoken of me to you please convey my regards to him. I have just brought out the Sanskrit rendering of Mr. Kailasam's "Kicaka" (Published by the Bharata Vani Press Poona). and that is the only Drama which I have so far brought out in print. The other books of mine which are printed are Sri Sitasvayamvaram (a Mahakavya in 16 cantos, Price. 2-8-0. Copies exhausted) Sri. Sabari Vilasam (a Khandakavya in 6 cantos Price 1-4-0. Copies available) Bharatiya Desa Bhakta Caritam Part I (a Gadyakavya. P.P. 36. Price 1.8.0. Copies available) and [illegible] Kicakam. Costs Rs 2/- per copy. In case you require a copy of each of these available works I will arrange to send them by V.P.P. as desired on hearing from you. There are still half a dozen more works in manuscript which I am trying

Sahityalankara Kavibhushana [illegible]
Dr. K. S. Narayanan, B.Sc, Ph.D.

11. 4th Cross. Road
Wilson Gardens
Bangalore-2.

16th Aug. 1961

Dear Dr. Satyavrata Sastry,

I am in receipt of your kind letter of the 12th instt and thank you very much. It is indeed very kind of Prof. M. Ramakrishna Bhat to have spoken of me to you please convey my regards to him. I have just brought out the Sanskrit rendering of Mr. Kailasam's "Kicaka" (Published by the Bharata vani Press Poona). and that is the only Drama which I have so far brought out in print. The other books of mine which are printed are Sri Sitasvayamvaram (a Mahakavya in 16 Cantos Price. 2-8-0. Copies exhausted) Sri. Sabari Vilasam (a Khanda Kavya in 6 Cantos Price 1-4-0. Copies available) Bharatiya Desa Bhakta Caritam Part I (a Gadya Kavya. P.P. 86. Price 1.8.0. Copies available) and Unmatta Kicakam Costs Rs 2/- per Copy. In Case you require a copy of each of these available works I will arrange to send them by V.P.P. as desired on hearing from you. There are still half a dozen more works in manuscript which I am trying

I shall be grateful if you could return
my plays, at least the ones you have read.
Someone in Nagpur wants to produce
all of them if possible. If you like you
may give them to me when I pass thro'
Delhi on the 23rd August. I'll be reaching that
evening at 7 & proceeding to Bombay same
night by plane. My husband will spend a week
in Delhi. Address c/o Mr K. Dayal, 11/12 Kelendar
Mansion, Queensway Lane N. Delhi. Phone 47259.
Best wishes from Leela Row Dayal

पोस्ट कार्ड
POST CARD
THE ANNEXED CARD IS INTENDED FOR THE ADDRESS
POSTAGE
5 nP
INDIA

Dr Satyavrat Shastri
3/54, Roop Nagar
Delhi 6.

देहलीतः
१२।३।६४

प्रिय सत्यव्रत ज्योग्जीव्या नित्यं चाभ्युदियाः।
'विश्वसंस्कृते' ते निबन्धं प्रपठ्य यं हर्षप्रकर्ष-
मापं स वाचामगोचरः। ध्रुवमचिरेण
सारस्वते पथि पूर्वप्रस्थितानप्यत्यासादयिष्य-
सि, यथाश्वा रथं वेत्स्यसि (विद्लृ लाभ इत्यस्य
रूपम्)। सत्यं श्रीगान्धिचरिते भट्टाचार्यश्री-
हृषीकेशानां पदलालित्यं दुर्लभप्रायं परम्प्रस्ताव-
तरङ्गिण्यामनेकत्र शब्दसौष्ठवसहचरितं पदलालित्य
सध्रीचीनं चेतोहरं माधुर्यमस्ति यथा नजातु कामः

कामानाम् इति विषयके निबन्धे यथा
वा तीर्थं वाराणसी इति [illegible] के
प्रबन्धे।

कामये त्वं शास्त्रीशीलने नित्यं
रतः प्रवाचां सत्तमः स्याः। प्रयत्ने
ते पितृचरणाः अध्यापनकुले निर
वर्तयन्तीति विविदिषन्विरमामि
त्वद्धिताशंसी चारुदेव [illegible]

केवल पता
ADDRESS ONLY

Prof. Satya V[illegible]
Head of the Dep. of Sanskrit,
D.A.V. College,
Amritsar Pb.
(Punjab)

३/५४ देहलीशाखानगरात्
रूपनगरात्
१४।४।६६

प्रिय सत्यव्रत सर्वमायुरीयाः सततं चाभ्युदियाः,

पत्रं तेऽविद-
मवेदिषं च वृत्तम्। तत्र तत्र पत्रिकासु प्रकाशितचरांस्ते
निबन्धानवाचं वाचमनिर्वचनीयं कमप्यानन्दातिरेकं
समन्वेदिषम्, इदं च मनस्यकार्षं ध्रुवमचिरादयं नो
विनीततमो विनेयोऽसाधारणीं विदुरतां वेत्स्यति यशश्चाव-
दातं संचेष्यतीति। यत्र ममाभिरुचिते विद्वदर्हे कृत्ये प्रयुञ्जे
तत्र गुरुतर कार्यान्तरैकसर्गो नाहमुत्सहे सद्यः प्रवर्तितुम्।
व्याकरणचन्द्रोदयश्चोपसर्गार्थचन्द्रिका चेति द्वे कृती चिरप्रक्रान्ते
नाद्याप्यपवर्गं भजेते स्वल्पं चावशिष्यते ममायुर् इति कर्मा-
न्तरमात्ययिकमपि नेशेऽवधातुम्। किं करवाणि। परं वि-
ज्ञातोऽसि विस्रसया तत्प्रत्ययेन शरीरसादेन च। इच्छाम्यनु-

ॐ

निर्वर्तयेयं श्रेयश्चा~~...~~ ज्ञानमासाद-
येयम् । सर्वमिदं भगवति परमेश्वरेऽधि।
तत्कृपाकटाक्षित एवानीशो जन्तुः किम-
पि सम्भावितुमीशीत । त्वयापि मत्कारणा-
त्प्रार्थ्यः स वरदः प्रभुः सत्वरं मां
कुर्यादिति । अन्तराऽन्तरा स्ववृत्तं
प्रेष्य मच्चेतः सुखाकुरु । उत्तरोत्तरं रमतां
ते बुद्धिः शास्त्रेष्विति आशिषा त्वां संवर्ध्य
विरमाम्यहं विदां विधेयश्चारुदेवशास्त्री ॥

पोस्ट कार्ड
POST CARD
जवाबी
REPLY
केवल पता
ADDRESS ONLY

INDIA
6 nP
भारत

Prof. Satya Vrat M.A.
Govt. College,
Ganga Nagar,
(Rajasthan)

यस्य स्फीता विमलचरिता कृण्वतो विश्वमार्यं
प्रज्ञा प्राज्ञैः शिरसि नितरां धार्यतेऽद्यापि लोके ।
पुण्यश्लोकं तममृतकथं पूर्वभूचारुदेवं
वन्दे प्रीत्या सुकृतनिचयैरद्य तं चारुदेवम् ॥ ७ ॥

विद्वत्कीर्तौ जननमरणप्रत्यवायो न कोऽपि
विच्छेदो वा न किल निखिले प्राज्यकालप्रवाहे ।
अस्माद्धेतोरजरममरं सार्वभौमञ्च च मत्वा
वन्दे वन्द्यं विततधिषणं चारुसारस्वतेयम् ॥ ८ ॥

विश्वविद्यालये ख्याते प्राणागीये प्रवाचकः ।
सम्प्रत्युदयनाख्ये च बालीद्वीपेऽतिथिर्गुरुः ॥ ९ ॥

मिश्रोऽभिराजराजेन्द्रश्चारुदेवं बुधोत्तमम् ।
सादरं स्तौति सश्रद्धं काव्यकार्तार्थ्यकामनः ॥ १० ॥

श्रीचारुदेवशास्त्रिणां संस्कृतपत्राणि

डॉ० सत्यव्रतशास्त्री

पूर्व-कुलपतिः, श्रीजगन्नाथ-संस्कृत-विश्वविद्यालयः, पुरी (उड़ीसा) ;

आचार्यः, संस्कृत-विभागः, दिल्ली-विश्वविद्यालयः, दिल्ली

पुण्यश्लोकैः श्रीचारुदेवशास्त्रिभिस्तथाऽऽत्मा संस्कृताय समर्पितोऽभूद्यथा ते संस्कृतज्ञान् स्वबन्धून् स्वसुहृदश्च संस्कृतेनैव पत्राणि प्रैरिरन् । परश्शतानि तादृशानि पत्राणि तैः प्रेषितानि । यदि तद्बन्धवः तत्सुहृदश्च तेष्ववहिताः भवेयुस्तर्हि महानयं पत्रसङ्ग्रहः प्रकाशितः सन् बह्वुपकुर्वीतास्य जगतः । संस्कृत-वाग्व्यवहारे यथा तेषां नैपुणी न तथाऽन्येषां बहूनां प्राचामपि, किमुतार्वाचाम् । ये हि महावैयाकरणस्य कविमूर्धन्यस्य भट्टेरपि काव्ये स्खलितानि निरदिक्षन्, "भट्ट्याद्यैः सूरिभिश्चापि सम्प्रदायो न रक्षित" इति चोदजूघुषन्, कस्ततुला-मधिरोहेत् । तेषां सुरगवीगुम्फा न केवलं तद्ग्रन्थेषु तन्निबन्धेष्वेव वा जाग्रत्यपि तु तत्पत्रेष्वपीति संस्कृतवाङ्मये तान्यन्तर्भावमर्हन्ति । तेभ्योऽपि संस्कृतवाग्रचना तस्यास्तात्त्विकं स्वरूपं च ज्ञातुं शक्येतेति निर्मायं ब्रूमः । लोकस्याचार्यकं कुर्वाणाः शब्दप्रमाणका एते विद्वत्प्राग्रहरा यं कमपि विषयं संस्कृतेनोपास्थापयंस्तेनैव साधिष्ठः संस्कृतवाग्व्यवहारः शिक्षितुमशक्यत ।

अहं तेषां प्रियः पुत्र इति काले काले ते मां पत्राणि प्रैरिरन्संस्कृतेनैव । तेषु प्रायशः सर्वाण्येव मयि सन्ति । सोऽयममूल्यो मे सङ्ग्रहः । दिल्ल्या-गमनात्पूर्वं तानि तैर्मां प्रति प्रेषितानि । देशविभाजनानन्तरं प्रथमं तेऽहिया-पुरमितिनामकं स्वजन्मस्थानं प्राप्तास्तदनु च महाविद्यालयसेवार्थमम्बालापुरीम् । अहं तु तदा वाराणस्यामधीयान आसम् । अतः पत्रमाध्यमेनैवावयोः संव्यवहारः प्रावर्तत । वाराणस्यामध्ययनं पर्यवसाय्याहं दिल्ल्यां प्राध्यापकरूपेण नियुक्तः । तदा पितृचरणाः विश्वेश्वरानन्दवैदिकशोधसंस्थानेऽवैतनिकरूपेण कर्मरता आसन् । आसन्नावर्षद्वयं दिल्ल्यां व्यतियाप्य कञ्चित्कालमहं कुरुक्षेत्रे व्यत्ययापयम् । तदनु पुनरपि दिल्ल्यां नियुक्तिमापम् । तदाप्रभृति पितृचरणसेवावकाशो मया साक्षाल्लब्ध इति धन्यमात्मानं कलयामि । यावन्तं कालं तेभ्योऽहं दूरेऽभवं तावति काले तैर्नाना पत्राणि प्रेषितानि । तेषु नैके कौटुम्बिका विषयास्तैः स्पृष्टाः प्रबोधितश्चाहमनेकान् अर्थान् ।

पितृचरणा मम स्वास्थ्यविषये बहुचिन्तिता आसत । व्यायामस्तदर्थं सुतरामावश्यक इति ते मां बहुधाऽवोचन् । जनेन न केवलमध्ययनरतेनैव भाव्यं शरीरस्वास्थ्यायापि काश्चित्कालकलास्तेन विनियोज्या इति ते प्रण्यगदन् ।

व्यायामक्षुण्णगात्रस्य पद्भ्यामुद्वर्तितस्य च ।
व्याधयो नोपसर्पन्ति वैनतेयमिवोरगाः ॥

इति तेषामासीत्प्रियं पद्यम् । १३. ९. १९५४-दिनाङ्के स्वग्रामादहियापुरात्प्रेषिते पत्ते व्यायामविषये ते मामित्थमबूबुधन्—"स्वे कर्मणि निरन्तरं व्यापृतोऽश्रान्तं च श्राम्यन् मा स्म शरीर उदासितो भूः । इदं हि सत्तमं साधनं सिद्धीनां भृशं चोपकारकमापतेः ।" कस्मिंश्चित्पत्ते मया लिखितं भवेच्छीर्षवेदना मेऽस्ति । ततः परतरं च कञ्चित्कालं नाहं पत्तं प्राहिणवम् । तदेवोद्दिश्याम्बालयतः (अम्बालातः) २३. ३. १९५४-दिनाङ्के प्रेषिते पत्ते पितृचरणा माममलिखन्—"अद्य चिरं ते कुशलोदन्तस्य सम्प्राप्तस्य । कच्चित्स्वस्थोऽसि शरीरे ? यस्त्वं क्वचित्पत्तेऽलेखीः - शीर्षवेदना मेऽस्तीति शिरोभ्रान्तिर्वा मे जायत इति तत्परामृशतोरावयोर्मनः सव्यथमास्ते । कथय कीदृशीदानीं ते शरीरसमवस्थेति । कर्हि विश्वविद्यालयो नैदाघस्यानध्यायस्य कृते संवरीता (कर्मणि लुट्), कर्हि च वाराणसीतः प्रतिष्ठाससे ? संवृते विश्वविद्यालये वाराणस्यां स्थित्या नार्थः, निदाघप्रसरदोषाश्च प्रचुरा भवन्तीति मन्येऽप्रेलमासारम्भ एव तत प्रस्थानीयम् । अहं त्वप्रेलमासोपक्रम एव होश्यारपुरं प्रति प्रस्थास्ये । तत्रोपसर्गार्थचन्द्रिकायाः कृते जर्मनकोषान्मे बहु सङ्ग्राह्यमस्ति । यदीच्छसि त्वमपि तत्रैव मया समं पादोनं मासमवतिष्ठेथाः स्वमध्ययनं च प्रवर्तयेथाः । यथा ते रोचते तथा वा करिष्यसीति कामचारस्ते ।" ३०.७.१९५९ - दिनाङ्के होश्यारपुरतः प्रेरिते पत्ते व्यायामविषये ममोदासीनतामुपलक्ष्य पितृचरणाः स्वकीयां मानसीं व्यथामित्थमाविरकुर्वन्—

"इदं च भूयोऽनुशास्मि त्वां शरीरे स्वेऽधातव्यमिति । कुतस्त्वां व्यायामभीरुत्वमुपस्थितम् । किं शङ्कसे व्यायामो विकरिष्यति ते कायम् । यद्येवमस्थाने शङ्कितं ते । श्लथाङ्गः पिचण्डिलस्ते कायो दुर्भरतामिवोपैति । मेदस उपचयो रुजां पृथग्विधानामगारमिति महतीं चिन्तां मे जनयति । शारीरीं समवस्थां ते चिन्तयन्नहं न क्षणमपि निर्वृणोमि । यदेतराञ् श्लिष्टावयवान् दृढाङ्गांस्तरुणान् पश्यामि स्पृहयामि तादृशस्त्वमपि स्या इति ।

परमसकृत् प्रबोधितोऽपि न त्वमनिष्टामायतिमुत्प्रेक्षसे न च तां वारयितुं मनागपि चेष्टसे । वत्स ! कालस्तेऽयं शरीरं समाधातुम् । अतिक्रामति कालः अपुनरावर्ती चायम् । अद्य वत्सराः केचन प्रेरयतो मम । अप्येषा प्रेरणा फलवती भविष्यति ? बाढमारभे चैव व्यायाममिति वचसा निर्वापय तप्तं मे चेतः ।"

यथा व्यायामविषये पितृचरणाः काले काले मां प्राबूबुधंस्तथैवाध्ययनविषयेऽपि । आचार्यपरीक्षार्थं कथं मया प्रवर्तितव्यमिति विषये २७.११.१९५३ - दिनाङ्के प्रेषिते पत्ते ते मामित्थं निरदिक्षन्—"सर्वं प्रच्छनीयमिति सम्भावितं भाष्यादिस्थलमसकृदावर्तनीयम्, प्रश्नोत्तरमालया च निबन्धनीयं, गुरुचरणैश्च परिष्कारणीयम् । इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणामिति स्मरणीयम् ।"

पी-एच्० डी० इत्युपाध्यर्थं काशीहिन्दूविश्वविद्यालये भर्तृहरिकृतवाक्यपदीयस्य दिक्कालसमुद्देशावधिकृत्यानुसन्धानकर्मण्यहं प्रावृतम् । तद्विषयेऽपि पितृचरणाः काले काल इति कर्तव्यताप्रबोधनेन बहु ममोपाकुर्वन् । अम्बालयतः षष्ठे दिशाम्बरस्य वासरे (वर्षनिर्देशस्तत्र नास्ति) प्रेषिते पत्ते त एवमवोचन्—"हरिमतसंवादीनि तन्मतविसंवादीनि वाऽन्यदीयानि वाक्यानि यथास्थानमुपन्यसनीयानि, तत्तदर्थश्च सङ्ग्रहेण देयः । तात्पर्येऽवधातव्यं न तु पदार्थे । उद्धरणानीमानि पत्नपार्श्वमूले देयानि, न तु मध्ये, तत्र तु तदर्थ एव सङ्केत्यः । इति सर्वमालोच्य प्रक्रमः कार्यः ।"

१४. १२. १९५४—दिनाङ्के प्रेषित एकस्मिन्नपरस्मिन्पत्तेऽपि शोधप्रबन्धनिर्माणविषये विस्तरेण ते मां निरदिक्षन्—"त्वन्निबन्धनीयेऽर्थे त्विमां विधामनुविधेयामुत्पश्यामि । प्रथमं तावद् हरिणा कारिकाभिरुपनिबद्धोऽर्थं आङ्गलभाषान्तरेण सहचरितो विशदं संनिधाप्यः । पश्चाद् एके, अपरे इत्यादिकारिकागतं पदमाश्रित्य वैशेषिकाणां मतमिह हरिणा प्रत्यवमृष्टम् । तथा च प्रशस्तपादभाष्यादिषु तन्निबन्धनं दृश्यते किरणावल्यादिषु च विस्तरेण व्याख्यायते । सोऽयं सन्दर्भः प्रकृतार्थवैशद्यं करोतीति निखिलेनेहोद्ध्रियते । इत्यपोद्धृत्य तत्तद्ग्रन्थो देयः । निबन्धमध्ये तत्तदुद्धारार्थो देयः, पत्रपार्श्वे च मूलविन्यासः ससङ्केतः कार्यः । एवं क्रियमाणे निबन्धस्य ते कलेवरमपि पोषं पर्याप्तमाप्स्यति विषयश्च प्रतिपिपादयिषितः साधीयो विवरीष्यते ।"

दिक्कालसमुद्देशसमीक्षणनिर्णयात्पूर्वं कदाचित्स्फोटनिर्णयविषये मया पी-एच्० डी० इत्युपाध्यर्थमात्मा व्यापारणीयो वा न वेत्यर्थं पृष्टास्तातचरणा ७.१२.१९५३—दिनाङ्केऽम्बालयतः प्रेषिते पत्र इत्थं प्रत्यपीपदन्—"स्फोटविषयं चेदनुसन्धेयं पश्यसि तर्हि तत्रैवाध्ययनं सविशेषं प्रवर्त्यताम्। इदं तावद् व्यवसेयं पूर्वैर्यावद् विवेचितं ततोऽप्यधिकं किञ्चिद्विवेच्यमस्तीत्याहो नेति। यदि नाम सन्त्यपरामृष्टा ग्रन्थाः पूर्वैरनालोकितास्तदा ध्रुवं तत्र नूत्नोऽर्थः शक्य उपज्ञातुम्। नूत्नार्थोपज्ञयैव च चारितार्थ्यं स्वस्याभ्युपेयम्।"

पी-एच्० डी० इत्युपाध्यर्थं स्वकीयः प्रबन्धो मया वर्षद्वयावरे काल एव समुपस्थापयितव्य इत्यासीन्मम सङ्कल्पः। अल्पीयानेवासीन्मयि समयस्तं प्रणेतुम्, मासविशेष एव च तं समुपस्थापयितुम् इति चिन्ताचान्तचेता अहं पितृचरणान् स्वकीयां मनस्तान्तिमसूसुचम्। तज्ज्ञात्वा तैरहमित्थमनुशिष्टः—"अविदं ते वृत्तमवेविषं च चिन्ताभराक्रान्तोऽसुखितश्चासीति। सत्यमनल्पं ते कृत्यमल्पीयांश्च त्वदुपयोग्यः कालः। अगृहीततत्तद्ग्रन्थाशयस्त्वं कथं तत्तन्मतं सङ्गृह्णीयाः। कथं वा स्थाने तत्तन्न्यासं कुर्या इति गुरोस्ते ते ग्रन्था अध्येतव्याः सारग्रहायेत्यर्थादापद्यते। तथापि सततमभियुञ्जानस्त्वं तत्र सिद्धिमभीप्सितामाप्स्यसीति मा स्म विषदः। प्रारब्धं परिसमापनीयमिति धीयतां धीः।"

न केवलं मदीया शास्त्रचिन्तैव तन्मनसि, सततमवर्तत, मल्लौकिकसुखसौविध्यसम्पादनसमीहाऽपि या हि ३०.१२.१९५४—दिनाङ्केऽम्बालयतः प्रेषितात्पत्रादुन्नेतुं शक्यते—"पिण्डधस्तु प्रथमे सप्ताहे संस्कृताः स्यास्यन्ति। स सुजनो वाच्यः स्वयमुपेत्य ता धावदीतेति। किञ्च, त्वत्सकाशे यान्यतिरिक्तानि कुतुपादीनि करण्डादीनि वा तानि प्रियं धर्मपालं द्वारीकृत्येह प्रहेयाणि यथा तानि त्वदर्थेऽर्थसम्प्रेषणे समुपयोगं नीयेरंस्त्वदीयश्च भारः कयापि कलया लाघवमियात्। घृतमात्राऽपि कियतीचित् सम्प्रेषयिष्यते प्रत्ययं समुत्पादिता।"

यद्यपि पितृचरणा निरन्तरं शास्त्रानुशीलनरता एवासंस्तथापि लौकिकज्ञानवैधुर्यं तेषां नाभूत्। महर्षिकण्ववत्तेऽपि यद्यपि नासन्वनौकसस्तथापि लोकेनासम्पृक्ता अपि लौकिकज्ञा अभूवन्। मां द्वितीयाश्रमोपसङ्क्रमयोग्यमुपलक्ष्य तद्विषयेऽपीतिकर्तव्यतायां ते मनो ददुः। कन्यापितरो यदा तान्प्राचूचुदंस्तदा ते तैः समगंसत कन्यकाश्चापि साक्षादक्षत। तादृशीं

कदाचित्कन्यकां साक्षात्कृतवतां तेषां मनसि ये भावाः प्रस्फुटितास्तांस्त इत्थं प्राचीकटन्—"भिषग्वरस्य गुण्यां तां कन्यकामप्यदर्शं तया समं कामपि कालकलां समलापिषं च। सर्वथा निभृता गुणाढ्याऽपि सा यत्सत्यं मह्यं नारुचत्। वर्णो नास्ति यः स्पृहाविषयः स्यात्। अङ्गसौष्ठवमपि नास्ति यद् रुचिरं स्यात्। कान्तिस्तु दूरापेता। कुलं सर्वथाऽन्वेषणीयसम्बन्धम्। डाक्टरोऽपि मधुर उदारः प्रश्रितश्च। परं कन्यकाया मुखाकृतिर्मुखवर्णश्च सुतरां शोभाविधुरौ। शरीरे किमपि वैवर्ण्यमपि लक्ष्यते। ईक्षणे च सहायापेक्षे। एवं सति किं क्रियताम्?"

एकदा मत्पितृव्येण कस्यचनात्युच्चैः पदाधिकारिणः सुताया विवाहप्रसङ्गो मदर्थं समुपस्थापितो यदुद्दिश्य नाना विकल्पा पितृचरणानां मनसि प्रादुर्भूता ये वैवाहिके विषयेऽपि तेषां सूक्ष्मेक्षिकां गहनं च चिन्तनमभिव्यञ्जन्ति—"बहुशश्चिन्तितोऽयमर्थो मया। उच्चैस्तरेण राज्ञार्चितेनान्ववायेन नोऽभिसम्बन्धो नः समुत्कर्ष्यतीत्येकः पक्षः। उच्चैरास्पदप्रतिलम्भेऽपि महीयोऽधिकारप्राप्तावप्यङ्गभावं यायाविति नासम्भवि। परमेतादृशे कुले सम्भूता कन्यका किंशीला भविष्यति, नम्रा वोद्धता वा, सेवापरा सेवापराङ्मुखी वा, वृद्धेषु भक्तिमती वा निरपेक्षा वेति सन्देहास्कन्नोऽर्थः, त्वय्यप्यनुगुणं वर्तेतोत प्रतीपमिति सावलेपा गृहं निरयीकुर्यादित्यपि शङ्क्यते। सर्वथाऽन्यादृशोऽस्माकमाचारो विचारश्च तदन्वयाभिवितादाचाराद् विचाराच्च। तेन सर्वं साध्वालोच्य प्रक्रमः कार्यः। मा स्म वयमस्थाने पदमर्पिपाम।" (होश्यारपुरात् ६.११.१९५६-दिनाङ्के प्रेषितात्पत्रादुद्धृतोंऽशः)।

अहमपि पितृचरणान् पत्राणि संस्कृतेनैव प्रेरिरम्। ते च तेषु यदि किमपि चिन्त्यमपश्यंस्तर्ह्यवश्यमेव तन्मां प्रत्यबोधयन्। तथाहि—१. पुच पैशुन्येऽदन्तः तेनाऽग्लोपित्वादुपधाह्रस्वो नेति अपुपुचत् इति रूपम्। 'अह्नोऽह्न एतेभ्य' इति सर्वाह्णः इति भवति। स्फुर सञ्चलने इत्यस्य णिचि लुङि अपुस्फुरदिति रूपमात्वपक्षेऽपीति माधवीय-धातुवृत्तिः। अहियापुरतोऽगस्त्यस्य चतुर्थेऽह्नि (वर्षसङ्केतस्त्वत्र नास्ति) प्रेषितात्पत्रादुद्धृतोंऽशः)।

२. "यच्चत्वया पूर्णचन्द्रमहं स्मर्तव्य इत्युक्तं तत्साधूकरणीयम्। न हि स्मरतिर्द्विकर्मकः। स्मारयतिरपि द्विकर्मको नेति दीक्षितः। गत्यादिसूत्रे बुद्ध्यर्थकत्वेन ज्ञानसामान्यवचना जानातिप्रभृतयो गृह्यन्ते। स्मरतिस्तु ज्ञानविशेषवचनः। भवभूतिस्तु नैतदाद्रियते यदाह—य एव

दुस्सहः कालस्तमेव स्मारिता वयमिति । तेनाऽहं पूर्णचन्द्रेण **स्मारयितव्य** इति दीक्षितमतेन, **पूर्णचन्द्रं स्मारयितव्यः, पूर्णचन्द्रतः मां स्मारयितव्य** इति मतान्तरेण तत्र प्रयोज्यकर्मणि वा तव्यः। वुद्धिभक्षार्थयोः शब्दकर्मकाणां निजेच्छयेति वचनात्।" (अम्बालयतः २६.११.१९५३–दिनाङ्के प्रेषितात्पत्त्रादुद्धृतोंऽशः)।

३. **मनसिकृत्य मनसिकृत्वेति** चोभयं साधु । अनत्याधाने उरसिमनसी इति विभाषा गतिसंज्ञाविधेः । (अम्बालयतः १५.३.१९५५)-दिनाङ्के प्रेषितात्पत्त्रादुद्धृतोंऽशः)।

४. कर्मणि लुङि बहुवचने **अदायिषत अदिषत** इति रूपद्वयं भवतीति स्मरणीयम् । तत्र चिण्वद्भावकृतो विशेषः । (अम्बालयतः ९.३.१९५४–दिनाङ्के प्रेषितात्पत्त्रादुद्धृतोंऽशः)।

कदाचित्पितृचरणा जिज्ञासामपि व्याकरणविषयिणीं काञ्चन स्वपत्त्रे समुपास्थापयन्। प्राचोदयंश्च मां तत्समाधानाय काशिकान्मे गुरूनुपसत्तुम् । अम्बालयतः १५. ३. १९५५–दिनाङ्के प्रेषिते पत्त्रे ते निरदिक्षन्—

"इदं च ते गुरवो जिज्ञासितव्याः। विसंपूर्वाद् वदेर्विमत्यर्थे आत्मनेपदं भवत्युत नेति । भासनोपसम्भाषेत्यादिसूत्रे भासनादिषु विशेषणेषु सत्स्विति वृत्तौ स्थितम्। उपसर्गनियमस्तु नोक्तो विपूर्वता वा न नियता। विमतेरन्यत्र तु कामं परस्मैपदं भवतु यथा विसंवदन्त्यक्षराणीत्यादौ, विमतावात्मनेपदं कुतो न स्यात्।"

पितृचरणानां होश्यारपुरीय-साध्वाश्रमस्थं विश्वेश्वरानन्दशोध-संस्थानं प्रति विशिष्टोऽनुरागोऽभूत्। काले काले ते तदुपासदन्। केवलमेकमवसरं विहाय यदा मातृचरणा अपि तैः सहासन्, त एकाकिन एव तदध्यवसन्। तत्र भोजनसंविधा साधीयसी नेति कदाचित्ते मामसुसूचन्—**"इदानीमहं स्वकार्यनिरतोऽनन्यमनाः सुखं कालं नयामि। इदमेवैकं दुःखाकरोति नेह तादृशी भोजनसंविधाऽस्ति यादृशी ममानुगुणा स्यात्। सुलभे नाम दधिपयसी, परं ते याप्ये भवतो न प्रशस्ये। शाकाद्यपि न विविच्य पाकाय परिगृह्यते, किन्तर्हि यत्किमपि स्वल्पपथ्यं भवति तदादीयते । उपशयीत भोक्तुर्मा**

वोपशयिष्ट तदिति नाद्रियते। (९.४.१९५४-दिनाङ्के होश्यारपुरात्प्रेषितात्पत्त्रादुद्धृतोंऽशः)।

यदा कुरुक्षेत्रे मे नियुक्तिर्जाता तदा मया सहयोगिषु छात्रेषु वा कथं वर्तितव्यमिति ते मामन्वशिषन्—**"इदमेव तु विवक्षे—स्वे कर्मणि सर्वात्मना व्याप्रियस्व, आर्जवेन च गुरुषु वर्तस्व, विनेयेषु च हार्देनातिरिक्तेन प्रवर्तस्व। नान्यच्चिन्तय, न च रुष्य, न चाऽपरागमर्हति जने समीरय "** (देहलीतः १८.३.१९५८–दिनाङ्के प्रेषितात्पत्त्रादुद्धृतोंऽशः)।

एवं सन्ति बहुविधानि वाक्यानि पितृचरणानां पत्त्रेषूपदेशपराणि येषां सार्वकालिकं सार्वभौमिकं च महत्त्वम्। मामुद्दिश्य प्रणीतानि तान्युपदेशवचांसि मम सुतरामुपाकुर्वन्नन्येषामपि तथैवोपकुर्युरिति तानि विचार्य विचार्यमत्रोपन्यस्तानि । तादृशा विद्वत्तल्लजास्तथा वचांसि विन्यासथन्यथा तानि सर्वस्य लोकस्योपकारकाणि भवितुमर्हन्ति । प्रातःस्मरणीयास्ते सम्प्रति कथाशेषतां गताः। तेषां वाग्गुम्फा अस्मान् सुपथे नयेयुश्चेत्फलेग्रहि स्यादस्माकं जीवितमिति नापेक्ष्यते बहु वचः। पत्त्रेषु तेषु तेषु स्थितास्तद्वाग्गुम्फा अन्येषामसुलभा अपि सुलभीक्रियेरन्नित्येतदर्थक एव नः प्रकृतो यत्नः। एतदेव वचः समुपन्यस्य निबन्धोऽयमुपसंह्रियत इत्योम्॥

—३/५४, रूप नगर, दिल्ली - ११० ००७.

कमल - बन्धः



○ उद्धार :—चारुदेवः कृती महान् ।

\+ १. रुद्रस्तुतिकरः कृती,
२. देवतास्मृतिमिच्छेम ।
३. कृष्णस्तुतिकृता वाचा,
४. हानीनां क्षतिरस्तु वः ॥

○

श्रीचारुदेवशास्त्रिणां गद्य-गौरवम्

डॉ० सत्यव्रतः
संस्कृत-विभागाध्यक्षः, राजकीयो महाविद्यालयः, श्रीगङ्गानगरम् (राज०)

अभिनवः पाणिनिः इत्यद्वितीयगतेन शब्देन सविशेषं विश्रुताः, निगमागमादिनिखिलार्थावगाहिन्या प्रखरप्रखरया धिषणयाधरीकृतधिषणाः पण्डिततल्लजाः श्रीचारुदेवशास्त्रिणः शतकल्पमायुरनुभूय विद्वदर्हमनतिसामान्यमदभ्रं किमपि कृत्यजातं च निष्पाद्य परमं धाम प्रयाता इति रुग्विदीर्णानि सुरवाग्घेवाकिनां मानसानि । ऋतम्भरया प्रज्ञया, गभीरेण वैदुष्येण प्रविरलगुणसम्भारेणानवद्याचारेण आत्मानुशासनेन च निर्मलप्रतिभाजुषां प्राचामृषिपुङ्गवानां तुलामारोहन् शस्त्रिवर्य्याः । तेषां निधनेन निरालम्बा जाता सरस्वती, दैन्यमापन्नं शब्दशास्त्रम्, अवसिता ऋषिपरम्परा, विलीनं सौजन्यम्, उच्छिन्नमौदार्यं नामशेषं गता वाग्मिता, शोषमिता काव्यरसिकता, किं बहुना जगज्जीर्णारण्यं समजनि । न जातुचिन् म्रियन्ते मनस्विनः । **ब्रह्मविद् ब्रह्मैव भवति** इति शब्दब्रह्मविदो मे गुरुचरणाः परब्रह्मणा शब्दब्रह्मणा च सायुज्यं प्रपन्नाः, नात्रारेकः । अव्यभिचारि तद्वचो यत्ते **पार्थिवं कायमुत्सृज्य यशःकायं समाश्रिताः** हम्मीरनरेश्वरमनुशोचता नयचन्द्रसूरिणा यदभाणि तत्कलया विपर्यस्य पार्यंत उदीरितुं निजैः सुकृतैः पुण्यैश्च चारित्रैस्ते प्रतिपदं भुवि राजमानाः प्रत्यक्षं विलोकयन्त इति ।

१८९६ ख्रिष्टाब्दे पञ्चापप्रदेशे होशियारपुरमण्डलान्तर्गते धन्येऽहियापुराभिधे ग्रामे गृहीतजनुषः श्रीरामकृष्णतनुजनुषः पण्डितवर्य्या आशैशवात् शब्दशास्त्रेऽविरलां रुचिं दधुः, अनारतेनाध्यवसायेन च कालान्तरे तत्र तथा पारीणा बभूवुर्यथा पाणिनीये शास्त्रेऽधीतिषु तेऽनन्यलङ्घ्यं पदमवापुः । गहनगहनमपि तच्छास्त्रं तेषां हस्तामलकवद् अप्रच्छन्नं बभासे तस्य तलस्पृङ्मर्मज्ञत्वेन च ते दिग्देशेषु ख्यातिं लेभिरे । न तत्रासीत्काचित्कुलपरम्परा न च तैरसेविषत पाण्डित्यावासभूतानि गुरुकुलानि । जन्मान्तरोत्थितास्तपोराशिभिश्च प्रगुणीकृताः पुण्याः संस्कारास्तत्र कारणतामीयुः ।

अस्ति हि शास्त्रिवर्य्याणां हृद्यं किमपि व्याकरणदर्शनम् । पदान्वाख्यानमेव, शब्दानुशासनस्य सर्वस्वममन्यन्त प्राञ्चः । प्रकृतिप्रत्यया-

गमादेशादिभिः पदानि सम्यग्व्याकृत्य तदनुशिष्टिपरम्परा व्याकरणस्य प्राणत्वेन तैः प्रतिपादिता। पदनिष्पत्तिर्वाऽनुशिष्टिर्वा गरीयसी, अर्थोऽन्त्यजवल्लघीयान्निति बभूव तेषामभिमतम्। पदव्याकृतौ नार्थ इष्यते न च स शिष्यते। पदमात्रानुरोधादेव केषाञ्चित्पदानामर्था प्राचामपि परोक्षा बभूवुरिति न्यासाद् वा पदमञ्जरीतो वा स्वच्छं विभाव्यते। प्राक्षु श्राद्धा अपि पण्डितवर्य्या नेमामनुशासनसरणिम् अविकलाम् अदुष्टां वा मेनिरे। प्रत्यक्षसिद्धं ह्यस्या मोघत्वम्। अनयाधीयमानमध्याप्यमानं च व्याकरणं न बुद्धिविलासाद् व्यतिरिच्यते। शब्दसाधुत्वे शिष्टजुष्टव्यवहारसाधुत्वे च लोकस्योपचिकीर्षा शब्दशास्त्रोद्देश्यत्वेनाभ्युपेयुः शास्त्रिप्रवराः। इदं हि तेषां व्यवसितमभिमतं-वाक्यं व्याकरणं पदात् कथमपि न हीयत इति। शब्दशास्त्रं वाग्व्यवहारेण संयोज्य नूत्ना कापि व्याख्यानपद्धतिः शास्त्रिवर्य्यैः प्रावर्ति। नितान्तं काम्यमपि शास्त्रसाधुत्वं व्यवहारानुरोधाच्छिष्टानभिधानाच्च नाभिनन्दनीयम्। शास्त्रपुष्टमपि तदेव ग्राह्यं यच्छिष्टजुष्टं, नेतरत्। तदनुशिष्टिरेव व्याकरणस्य महिष्ठं गरिष्ठं च प्रयोजनम्। अत्र हि पण्डितप्रवरा न तन्वपि विसंवदन्ति महाभाष्यकृतो येन भूयांसः प्रयोगाः शिष्टानभ्युपगमान् न्यक्कृताः। एतामश्रुतपूर्वां रीतिं लोके प्रथयितुं बद्धमूलां च तां विधातुं स्वीयान् ग्रन्थान् ते प्रणीतवन्तः। शब्दापशब्दविवेकादयः प्रबन्धाः शब्दव्यवहारसाधुत्वे विनेयान् विनेतुमेव निरमीयन्त। तत्साहित्यमुकुटायमानो व्याकरणचन्द्रोदयः शास्त्रिवर्य्याणां व्याकरणदर्शनस्य आदर्शव्याख्यानारम्भत्वेन सविशेषमभिनन्दनीयः। अत्र हि पूर्वाचार्यैः प्रक्रान्तं प्रत्नं सम्प्रदायं सर्वात्मना परिपाल्य पदान्वाख्यानं शिष्टव्यवहारानुगेन वाक्येन तथा समायोजितं यथा पदमत्र वाक्यायते, वाक्यं च काव्यायते, काव्यं च रसायते, रसश्च मृद्वीकायते। शास्त्रसिद्धानि पदानि चन्द्रोदये निखिलवाङ्मयगृहीतेन प्रसन्नमधुरेण वाक्यनिचयेन सप्रयत्नं पर्यपोषि शास्त्रिवर्य्यैर्येन कर्कशं शास्त्रमधीयानोऽपि काव्यरसस्यापूर्वस्य गमनीयो भवति पाठकः। इत्थं वाग्व्यवहारेण सनिर्बन्धं सम्बद्धं स्वाभिधानं चान्वर्थं कुर्वाणो व्याकरणचन्द्रोदयोऽज्ञानमन्यथाज्ञानं वैकपदे व्याहृत्य ज्ञानज्योत्स्नां दिक्षु प्रसारयति।

अन्तरात्मना शास्त्रप्रज्ञोपेता अपि शास्त्रिवर्य्याः काव्यरसलोलुपा सहृदया आसन्। ललामभूतं प्राचीनं काव्यनिकरमविकलं तैरध्यगायि स्वकृतिभिश्च तदुपकर्तुं प्रशस्यं प्रयत्नं व्यधायि। यत्सत्यं संस्कृतगद्यदारिद्र्यमपाकर्तुं कृताभिनिवेशेषु साम्प्रतिकेषु प्रबन्धकृत्सु ते तुङ्गं किमपि पदमारोहन्ति।

लवपुरतः (लाहौरतः) १९३० खिष्टाब्दे प्रकाशितं श्रीगान्धिचरितं शास्त्रिवर्य्याणां परिपक्वेलिमापन्नाश्चर्यकरी गद्यकृतिरस्ति। अत्र लोकवन्द्यस्य परोपकरणीकृतकायस्य सविग्रहस्येव धर्मस्य महामहिम्नो गान्धिनो जन्मतः प्रभृति लवणशासनातिक्रमेण कारडीग्रामे तदासेधपर्यन्तमलोकसामान्यं चरितम् प्रथमतया विबुधवाचोपनिबद्धम्। षट्परिच्छेदात्मकोऽयं प्रबन्धोऽभिनवां चरितकाव्यशैलीं साहित्य आसूत्रयति, प्रथितयशसां गद्यसम्राड्भूतानां सुबन्धुबाणादीनां कृतिभ्यश्च सुदूरं विप्रतिपद्यते। नात्र प्रतिपाद्यं सपरिणाहवर्णनाकदम्बकैः परिक्षिप्तं व्यावर्ण्यत न च कालजीर्णालिकारततीनां साग्रहमनपेक्षं वा समावेशोऽकार्यत। कथ्यधारात्र वर्णनसेतुभिरव्याहतम् अबाध प्रवहति। गान्धिचरितम् आधुनिकीभिराङ्ग्लादिभाषाभिर्निबद्धैश्चरितकाव्यैः साम्यं बिभर्ति शैल्या प्रणयनपद्धत्या। तद्वदत्रापि विषयाभिव्यक्तिः प्राधान्यं प्रपद्यते। अन्यत्सर्वं च तदङ्गतामापद्यते। उच्चावचावस्थितिनिभृतो व्यतिकरभूयिष्ठोऽयमर्थस्तथौजस्विन्या संस्कारवत्या हृद्ययानवद्यया वाचा शास्त्रिवर्य्यैर्न्यबन्धि यथा प्राक्तनमापीयं गीः साम्प्रतिकेन विषयेण मनागपि नाभिभूता। अविकलेयं सकलं भावभरं भव्यं भावयति। इदं हि पण्डितवर्य्याणां वाच्यधिकारं शब्दशास्त्राधीतिं वाग्व्यवहारावगतिं च प्रकामं ख्यापयति। सकलं प्रसङ्गं ते तदनुरोधिन्या परिमृष्टया बलिष्ठया च वाचा निबद्धुं प्रभवन्ति। पञ्चापवैशसव्यतिकरो वा स्याद्, उपोषणवर्णना वा सत्याग्रहनिरूपणा वा भवेत्कार्यनिवृत्तिर्वा कवेस्तूलिका सर्वस्मै समं वैभवं प्रदातुमलम्। निभाल्यतां सत्याग्रहस्वरूपपुरस्सरं गान्धिन इदमुद्बोधनं सभायाम्—

सत्याग्रह आत्मबले प्रतितिष्ठति। ...... आत्मबलमजय्यं नित्यं च। शरीरस्य तु बलं महीयसा शक्त्यन्तरेण शस्त्रैः सैन्यैश्च विजेतुं ध्वंसयितुं वा पार्यते। सत्याग्रह एवं रूपस्यात्मबलस्य विजृम्भणप्रकारः। सत्याग्रही यद्यपि शत्रुं न कदर्थयति नेतरं शातयति तथापि हेलया शारीरं बलं पराभवति। ...... अतः क्रूराः इमे राज्याधिकृताः स्पष्टमिदमावेदनीयाः— यावच्छिन्नं नः शिरस्तावद् वयं नेमाम्वधीरणां सहिष्यामहे। अतो यद्येतद्विधानानुविधायित्वमस्माकमिष्यते तदेतत् प्रथमं कर्तनीयम्।"

पञ्चनदसंहारस्य लोमहर्षकं रौद्रत्वमधिकृतां क्रूरत्वञ्चात्र वर्णने साकल्येन सपदि प्रत्यक्षीभवति—

संनिपतिताः जनाः, निरुपप्लवा निरायुधाश्चासन्। ...... सेनापतिस्तु अग्निगुलिका - प्रक्षेपणीरादाय जहलोद्यानमागात्। प्रबोधनमन्तरेणैव च

ज्यानिर्जीवलोकस्य कदाचिदजनि यथाऽनेनास्त्रेण नूत्नेन संस्कारातिशय-विस्मितैरमेरीकास्थैः प्रयुक्तेन । निवेदनायां ग्रन्थकृता यन्न्यवेदि न ह्येतद-विलोकने व्यापृतास्ते (विपश्चित:) कालक्षेपस्य कृतेऽनुतप्स्यन्ते मान्द्यं वा समुत्साहस्य लप्स्यन्ते, अविप्लुतार्थं तद्वचोऽविकलम् । यत्सत्यमद्यत्व ईदृशानां प्रबन्धानां कर्त्तारो बोद्धारोऽपि विरला: । अमीषां केचित्तु संस्कृत-गद्यस्य किरीटायमाणा विराजन्ते ।

अवदातमिदं कर्कशे शास्त्रे मृदुनि च काव्यवस्तुनि लीलायते पण्डित-वराणां भारती । एतादृशं पाण्डित्यं प्रविरलविषयं साम्प्रतम् । स्वर्या तेषु तेषु तद्भूय आहतमिति शोकाय । पल्लवग्राहिणो भूयिष्ठाः शास्त्रिसदृक्षाः मर्मग्राहिणोऽल्पिष्ठाः ।

वेश्यानामिव विद्यानां मुखं कैः कैर्न चुम्बितम् ।
हृदयग्राहिणस्तासां द्वित्राः सन्ति न सन्ति वा ॥

द्वित्राणां मध्येऽवर्तन्त श्रीचारुदेवशास्त्रिणः ।

श्रीचारुदेवाष्टकम्

डॉ० रामकिशोर मिश्र:
संस्कृत-विभागाध्यक्ष:, महामना मालवीय डिग्री कॉलेज,
खेकड़ा (मेरठ) - २०११०१ (उ० प्र०)

सारस्वतं जगति सारमवाप्य सर्वं
प्राप्ता हि येन हृदयेऽत्र सरस्वती सा ।
यो गद्यपद्यरचनादिकलाप्रवीणस्-
तं नौम्यहं कविवरं बुधचारुदेवम् ॥ १ ॥

हा दैव ! संस्कृतगिराऽभवदद्य शून्या
शून्या च संस्कृतसभा बुधमण्डली च ।
आकाशयन्त्रवचसाऽद्य वयं निषण्णाः
स्वर्गं गतः स नवपाणिनिचारुदेवः ॥ २ ॥

(१८९६)
शास्त्रग्रहाऽष्टवसुधाऽङ्कितवत्सरे यः
पञ्जाबधरां स्वजनुषा समलञ्चकार ।
येनाऽत्र गान्धिचरितं रचितं बुधेन
तं गद्यकारमिह नौमि सुचारुदेवम् ॥ ३ ॥

येनेत्थमापिशलि - पाणिनि - काशकृत्स्न-
श्रीशाकटायनकृता रचना अधीताः ।
प्राप्ता प्रसिद्धिरिहं येन च शब्दशास्त्रे
स्वर्गं गतः स नवपाणिनिचारुदेवः ॥ ४ ॥

श्रीबोधिसत्त्वचरितं रचितं च येन
येनेन्दिराचरितकाव्यमहो ! कृतं च ।
सत्यव्रतः कविवरः स सुतोऽस्ति यस्य
तं नौम्यहं कविवरं बुधचारुदेवम् ॥ ५ ॥

निरायुधेषु तेष्वाग्नेय-चूर्णप्रक्षेपणं प्रारभत। अयञ्चाग्निविसर्ग आचूर्णपरिसमाप्तेर्दशकला यावत् प्रावर्तत। …… पञ्चशतं षट्शतं वा तत्र प्राणैर्वियुक्ताः। एतदतिरिक्तसंख्याश्च क्षताः। …… अभ्यर्हिता नागरा अधिकरणान्यकृष्यन्त, कशयाऽभ्यहन्यन्त, जानुभ्यां विसर्पणं च बलादकार्यन्त।

गान्धिचरिते विद्यते गान्धिमहाभागस्य केषाञ्चिदभिभाषणानां पत्राणां चानुवादः। अयं भाषापरिवर्तस्तथा नैपुण्या व्यधायि सहजया गिरा च प्राणायि यथा सोऽनुवादपदवीं विहाय मूलपदं गृह्णाति। अस्ति अत्र चित्रकरी परिचेलिमा, अनन्यत्रलभ्या मनोरमा च वाक्।

गान्धिचरिते पण्डितवर्य्याणां पाण्डित्यं पदे पदे दृष्टिपथमायाति। तेषां गद्यकारत्वमत्र वैयाकरणेनाक्रान्तं नेदं विप्लुतार्थं वचः। शास्त्रिवर्य्येष्वपारा प्रतिभा विद्यते परं सा सर्वत्र पाण्डित्यघटयैवावृताऽऽविर्भवति। तेऽप्रतिमं स्वीयं शब्दशास्त्रवैदुष्यमत्रैकपदे समाहितवन्तो येनेदं गद्यकाव्यं तेषां पाण्डित्यवैजयन्तीं दधानं प्रतिभाति। असंस्तुतचराणां क्लिष्टक्लिष्टानां लुङां लिटां चानायोऽत्र साग्रहं ग्रथितो येन सदानितपदा अध्येतारः सायासमेव प्रसर्तुं प्रभवन्ति: अवादीधरन्, न्यभान्त्सीत्, उपालप्सत, संप्राहृषत, उपाक्रंसि इत्यादयः कष्टाः प्रयोगाः प्रतिपदं तेषां गतिं रुधन्ति। **अस्मिन्नचिरेण पिप्रिये भूमिपः** (पृ० ५) इत्यत्र प्रीङोऽकर्मकत्वम्, **व्यवहाराधीतये मोहनेनाङ्गलदेशस्य गमनमवश्यसंविधेयं मयेति** (पृ० ११) इत्यत्र मोहनस्य करणत्वम्, **तत्र सानन्दं सस्मितं भ्रूविकारमन्तरेण च ता रक्षिवर्गैरग्राहयन्** (पृ० ४५) इत्यत्र रक्षिवर्गस्य करणत्वम्, **प्रोषितान्भरतवर्षीयानदयमन्याय्यमाचरन्ति** (पृ० ५४) इत्यत्र भरतवर्षीयान् इति कर्मत्वं कथं समाधेयमिति न गोचरं पण्डितम्मन्यानाम्। अनेन गान्धिचरिते विपश्चितां परीक्षा प्रकामं भवति, परमयं पाण्डित्यातिरेको वाचो लालित्यं प्रसादं च व्याहन्तीति न संशीतिः। तद्धि दुर्लभप्रायमत्र। काव्यमिदं महात्मनः प्रकृष्टेनर्षिकल्पेन पुण्येन चरितेन राजनीतिवैशारद्येन राद्धान्तानुविधायित्वेन भारतस्वातन्त्र्यसमरवृत्तेन चाद्यन्तं प्राणितीति किमपि गौरवमावहति।

शास्त्रिवर्य्या उद्गीतमहिमानो निबन्धकृतोऽपि सन्ति। वैदेशिकीचिन्तननिभृतां निबन्धशैलीमनुरुध्य य आधुनिका निष्णाता देववाण्या निबन्धनिचयान् काले काले निबबन्धुस्तेषां गुरुचरणा मुखराः। १९५० खिष्टाब्दे काशीतः प्राकाश्यमिता प्रस्तावतरङ्गिणी विविधविषयावगाहिनां वैदुष्यनिर्भराणां

प्रबन्धरत्नानां चेतोहरा मञ्जूषास्ति। एकषष्टिप्रस्तावात्मिकेयं तरङ्गिणी पञ्च तरङ्गान् व्याप्य विराजतेतराम्। पण्डितप्रवेकानां व्यक्तित्वमिव प्रस्तावतरङ्गिणी पुराणत्वनवत्वयोः सारं समाहृत्य समुदैति!

प्रस्तावतरङ्गिण्याः प्रबन्धेषु निबन्धकर्तुरदभ्रं वैदुष्यं प्रकामं प्रतिफलति। प्रायेण सर्वे निबन्धा गम्भीरं सुष्ठु च परिचिन्तिताः साधुचोपवर्णिताः। केषुचिच्च विलोक्यतेऽपूर्वं विचारप्रात्यग्र्यं तदृद्धिश्च। पानीपतसमरः, छत्राश्वरूप्यकाणामात्मकथाः, दारुणा हि महाहवा भवन्ति इत्यादयः आधुनिकाः प्रबन्धाः प्रस्तावतरङ्गिण्यामेव प्रथमतया दृक्पथमवतरन्ति। विचारात्मकानां शास्त्रीयाणां च विषयाणां विवचने शास्त्रिवर्य्यैरेकतः पारम्परीणा पद्धतिरालम्बिता परतश्चाभिनवा विचारसरणिः परिगृहीता। अनेन तरङ्गिण्याः प्रबन्धाः प्रत्यग्रामभिख्यां पुष्णन्ति रोचकतां चानवद्यामावहन्ति। केचित्प्रबन्धाः प्रबन्धकर्तुः प्रौढिं प्रकटयन्ति। **विवक्षातः कारकाणि भवन्ति, पदार्थविकासः, करोतिना सर्वधात्वर्थानुवादः क्रियते** इत्यादयः केचिदपरे च तस्य ज्ञानस्य गाम्भीर्यं निर्दुष्टां च व्युत्पत्तिं प्रख्यापयन्ति। परिपचेलिमा हि या तदमीषां बंहिष्ठं वैशिष्ट्यम्। हासव्यङ्ग्ययोः समावेशश्चेदं प्रगुणीकरोति।

गान्धिचरितस्य कार्कश्यं विहाय पण्डितप्रवराणां शैली प्रस्तावतरङ्गिण्यां प्रसादं गृह्णातीति तोषाय। तरङ्गिण्या निबन्धेष्वनेकत्र शब्दसौष्ठवसहचरितं पदलालित्यसध्रीचीनं चेतोहरं माधुर्यमस्ति। शास्त्रिवर्य्याणां शास्त्रपारदृश्वता, प्राच्यप्रतीच्यशोधावगतिः, इतिहासप्रावीण्यं, भाषापाण्डित्यं, शब्दशास्त्रसिद्धत्वं च गरिष्ठां श्लाघामर्हन्ति, निबन्धकर्तुर्वैदग्ध्यं च सविशेषं प्रख्यापयन्ति। प्रबन्धकृतो वर्णनाशक्तिस्तलस्पर्शिनी मर्मोद्घाटिनी चास्ति। हीरोशीमाध्वंसनस्पेदं वर्णनं कल्पनाजन्यमपि याथार्थ्यपदवीमारोहति। …… **तथा न्यक्षेणोज्जासि तदभूद्यथा नात्र पुरा कदाचिदधिष्ठानं किमप्यासीदिति जायते प्रतीतः। समतलापि भूरुत्खातिनी समजनि, निरुदका च सोदका पुलिनवती च स्रोतस्वती। निर्दग्धानि राजसदनानि।** संहृतानि हर्म्याणि। कषितानि च कुटीराणि। भस्मावशेषतां च गतानि तरुलतानिकुरम्बाणि। सहस्रशो वपुष्मन्तः प्रतिभानवन्तः कलावन्तस्तत्पत्तनस्थाः निमेषेण यमधानीं प्रविष्टाः, का कथा मृगशकुनिसृपादीनाम्? गगने स्वैरविहाराणि पतत्ररथकुलानि वासाय प्रतिष्ठमानान्यन्तराऽश्वानमग्निच्छटातापेन सन्तप्तानि विचेष्टमानानि सद्यः कालधाम गतानि। किं बहुना! **भूकम्पेनाप्लावेन वा न तथा**

देहलीतः
१२।३।६४

प्रिय सत्यव्रत ज्योग्जीव्या नित्यं चाभ्युदियाः।
'विश्वसंस्कृते' ते निबन्धं प्रपठ्य यं हर्षप्रकर्षमापं स वाचामगोचरः। ध्रुवमचिरादेव सारस्वते पथि पूर्वप्रस्थितानप्यत्यासादयिष्यसि यशश्चादर्शं वेत्स्यसि (विद्लृ लाभ इत्यस्य रूपम्)। सत्यं श्रीगान्धिचरिते भट्टाचार्यश्रीहृषीकेशानां पदलालित्यं दुर्लभप्रायं परम्प्रस्तावतरङ्गिण्यामनेकत्र शब्दसौष्ठवसहचरितं पदलालित्यसध्रीचीनं चेतोहरं माधुर्यमस्ति यथा नजातुकाम.

3/54 देहलीशाखानगरात्
रूपनगरात्
१४।४।६८

प्रिय सत्यव्रत सर्वमायुरीयाः सततं चाभ्युदियाः, पत्रं तेऽविदमवेदिषं च तत्त्वम्। तत्र तत्र पत्रिकासु प्रकाशितचरांस्ते निबन्धान्वाचमनिर्वचनीयं ममध्यानन्दातिरेकं समन्वेदिषम्, इदं च मनस्यकार्षं ध्रुवमचिरादयं नो विनीततमो विनेयोऽसाधारणीं विदुरतां वेत्स्यति यशश्चावदातं संचेष्यतीति। यत्र ममाभिलषिते विद्वदर्हे कृत्ये प्रयुञ्जे तत्र गुरुतरकार्यान्तरैर्व्यग्रो नाहमुत्सहे सद्यः प्रवर्तितुम्। व्याकरणचन्द्रोदयश्चोपसर्गार्थचन्द्रिका चेति द्वे कृती चिरप्रयातो नाद्याप्यपवर्गं भजेते अल्पं चावशिष्यते ममायुः इति कर्मान्तरमात्ययिकमपि नेशेऽवधातुम्। किं करवाणि। परं क्लिन्नोऽस्मि विस्रंसया तत्प्रत्ययेन शरीरसादेन च। इच्छाम्यनु-

कामानाम् इति विषयके निबन्धे यथा
वा तीर्थं वाराणसी इति विषयके
प्रबन्धे।

कामये त्वं शास्त्रीशीलने नितं
रतः प्रवाच्यां सत्तमः स्याः। प्रयत्ने
ते पितृचरणाः अध्यापनकृत्यं निर-
वर्तयन्तीति विदित्वा विरमाम्यहं
त्वद्धिताशंसी चारुदेवशास्त्री॥

पोस्ट कार्ड
POST CARD
साथ का कार्ड जवाब के लिए
THE ANNEXED CARD IS INTENDED FOR THE ANSWER
केवल पता
ADDRESS ONLY

INDIA भारत 6

Prof. Satya Vrat M.A.
Head of the Department of Sanskrit,
D.A.V. College,
Amritsar P.O.
(Punjab)

